उच्छिष्टगणपति पंचांग

खेमराज श्रीकृष्णदास प्रकाशन
बम्बई

उच्छिष्टगणपत्युच्छिष्टचाण्डालिन्युपासने

प्रारम्भः

संस्करण : जुलाई २०१५, सवंत् २०७२

मूल्य : ५० रुपये मात्र

© सर्वाधिकार : प्रकाशक द्वारा सुरक्षित

Printers & Publishers :
Khemraj Shrikrishnadass Prop: Shri Venkateshwar Press, Khemraj Shrikrishnadass Marg, 7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai-400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013

अथोच्छिष्टगणपति—उच्छिष्टचांडालिन्युपासनास्थविषयानुक्रमणिका

पत्रांकाः	विषयांः
१	उच्छिष्टगणपतिपटलम् ।
१	उच्छिष्टगणपतिनवार्णमंत्रप्रयोग।
७	उच्छिष्टगणपतिनवार्णयंत्रम् ।
२०	रुद्रयामलतंत्रे प्रयोगविशेषः ।
२४	द्वादशाक्षरोच्छिष्टगणेशमंत्रप्रयोगः
२६	एकोनविंशत्यक्षरोच्छिष्टगणेशमंत्रप्रयोगः
२८	सप्तत्रिंशदक्षरोच्छिष्टगणेशमंत्रप्रयोगः
३८	प्रकारान्तरेणैकाधिकचत्वारिंशदक्षर भेदो रुद्रयामले ।
३९	मंत्रमहोदधौ द्वात्रिंशदक्षरमंत्रभेदः ।
४१	एकत्रिंशदक्षरमंत्रभेदः ।
४५	श्रीमदुच्छिष्टगणपति पूजापद्धतिः ।
१०९	श्रीमदुच्छिष्टगणपतिकवचम् ।
१२२	श्रीमदुच्छिष्टगणपतिसहस्रनामस्तो ।
१५८	श्रीमदुच्छिष्टगणेशस्तवराजः ।
	उच्छिष्टचांडालिन्युपासना।
१६५	उच्छिष्टचांडालिनीमंत्रा ।
१७५	उच्छिष्टचांडालिनीचेटकम् ।

समाप्तेयमनुक्रमणिका ।

मुद्रक एवं प्रकाशकः

खेमराज श्रीकृष्णदास,™

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४.

श्रीगणेशाय नमः ।। अथ श्रीमदुच्छिष्टगणपति-
पञ्चरत्नप्रारम्भः ।। तत्रादौ श्रीमदुच्छिष्टगणपति-
पटलं प्रारभ्यते ।। श्रीमहादेव उवाच ।। हस्तिपदं
समुच्चार्य पिशाचीतिपदं ततः ।। देवराजं सनेत्रं
च कान्तमीशस्वरान्वितम् ।। वह्निजायावधिर्मन्त्र-
स्ताराद्यः सर्वकामदः ।। प्रणवस्थाने गमिति
केचित् ।। अथोच्छिष्टगणपतिनवार्णमंत्रप्रयोगः।।
(मंत्रमहोदधौ) मंत्रो यथा ।। हस्तिपिशा-
चिलिखे स्वाहा ।। इति नवार्णमंत्रः । अस्य विधा

नम्—ॐ अस्य श्रीमदुच्छिष्टगणेशनवार्णमंत्रस्य कंकोल ऋषिः । विराट्छंदः । उच्छिष्टगण-पतिर्देवता । अखिलाप्तये जपे विनियोगः । ॐ कंकोलर्षये नमः शिरसि १ ॥ ॐ विराट्छंदसे नमः मुखे २ ॥ ॐ उच्छिष्टगणपतिदेवतायै नमः हृदि ३ ॥ ॐ विनियोगाय नमः सर्वांगे ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ हस्ति अंगुष्ठाभ्यां नमः १ ॥ ॐ पिशाचि तर्जनीभ्यां नमः २ ॥ ॐ लिखेमध्यमाभ्यां नमः ३ ॥ ॐ स्वाहा

अनामिकाभ्यां नमः ४ ॥ ॐ हस्तिपिशाचिलिखे कनिष्ठिकाभ्यां नमः ५ ॥ ॐ हस्तिपिशाचिलिखे स्वाहा करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ हस्ति हृदयाय नमः १ ॥ ॐ पिशाचि शिरसे स्वाहा २ ॥ ॐ लिखे शिखायै वषट् ३ ॥ ॐ स्वाहा कवचाय हुं ४ ॥ ॐ हस्ति-पिशाचि लिखे स्वाहा अस्त्राय फट् ५ ॥ इति हृदयादिपंचांगन्यासः॥एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशां

कुशौ मोदकपात्रदंतौ ।। करैर्दधानं सरसीरुहस्थ-
मुन्मत्तमुच्छिष्टगणेशमीडे ।।१।। इति ध्यायेत् ।।
ततः पीठादौ रचिते सर्वतोभद्रमंडले गणेशमंडले
वा मंडूकादिपरतत्त्वांतपीठदेवताः पद्धतिमार्गेण
संस्थाप्य ॐ मं मंडकादिपरतत्त्वांतपीठदेवता-
भ्यो नमः । इति संपूज्य नव पीठशक्तीः पूजयेत् ।।
तद्यथा पूर्वादिक्रमेण ॐ तीव्रायै नमः १ ॐ
चालिन्यै नमः २ ॐ नंदायै नमः ३ ॐ भोगदायै
नमः ४ ॐ कामरूपिण्यै नमः ५ ॐ उग्रायै नमः ६

ॐ तेजोवत्यै नमः ७ ॐ सत्यायै नमः ८ ॐ विघ्ननाशिन्यै नमः ९ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां च दत्त्वा स्वच्छवस्त्रेणाशोष्य ॥ ॐ ह्रीं सर्वशक्ति-कमलासनाय नमः ॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पद्धतिमार्गेण प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतै-रुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां

कुर्यात् ॥ तत्र क्रमः ॥ पुष्पांजलिमादाय "ॐ संविन्मयः परो देव परामृतरसप्रिय । अनुज्ञां देहि गणप परिवारार्चनाय मे ॥१॥" इति पठित्वा पुष्पांजलिं गणेशोपरि दत्त्वा पूजितस्तर्पितोऽस्तु इति वदेत् । इत्याज्ञां गृहीत्वा षट्कोणे * ॐ गां हस्ति हृदयाय नमः[१] १॥ हृदयश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र पठेत् ॥ १

* तन्त्रांतरे तु ॐ हस्तिपिशाचिलिखे स्वाहा गं हस्तिपिशाचिलिखे स्वाहा नवार्णभेदेन दशाक्षरीमंत्रः ॥ तत्र प्रणवस्थान गंबीजं वेदत् । इति पुस्तकान्तरे ।

उच्छिष्टगणपतिनवार्ण यंत्रम्



नैर्ऋत्ये ।। ॐ गीं पिशाचि शिरसे स्वाहा[२] शिरः श्रीपा. पू. त. २ ।। वायव्ये ।। ॐ गूं लिखे शिखायैं वषट्[३] शिखाश्रीपा. पू. त. ३ ।। ऐशान्ये ॐ गैं स्वाहा [४]कवचाय हुं कवचश्रीपादुकां पूजयामि त. ४ ।। मध्ये ।। ॐ गौं हस्तिपिशाचिलिखे स्वाहा नेत्रत्रयाय [५]वौषट् नेत्रत्रयश्रीपा. पू. त.५ ।। दिक्षु ।। ॐ गः हस्तिपिशाचिलिखे स्वाहा अस्त्राय फट् अस्त्रश्रीपादुकां पू. त. नमः ६ ।। इति पूजयेत् ।। ततः पुष्पांजलिमादाय मूलं पठित्वा ।।

"अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥१॥"
इति पुष्पांजलिं दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य
पूजितास्तर्पिताः संतु ॥ इति वदेत् ॥ इति
प्रथमावरणम् ॥१॥ ततोऽष्टदले पूज्यपूजक-
योरंतरालं प्राची तदनुसारेण अन्या दिशः प्रक-
ल्प्य दक्षहस्ते तर्जन्यगुंष्ठाभ्यां गंधाक्षतपुष्पाणि
गृहीत्वा प्राच्यादिक्रमेण अष्टसु दिक्षु ॥ प्राच्याम्
ॐ ब्राह्मै नमः ब्राह्मी श्रीपादुकां पूजयामि

तर्पयामि नमः १ ।। आग्नेय्याम् ॐ माहेश्वर्यै [८]नमः माहेश्वरीश्रीपादु. २ ।। दक्षिणे ॐ कौमार्यै [९]नमः कौमारीश्रीपा. ३ ।। नैर्ऋत्ये ॐ वैष्णव्यै [१०]नमः वैष्णवीश्रीपा. ४ ।। पश्चिमे ॐ वाराह्यै [११]नमः वाराहीश्रीपादुकां पू. त. ५ ।। वायव्ये ॐ इन्द्राण्यै [१२]नमः इन्द्राणीश्रीपा. ६ ।। उत्तरे ॐ चामुंडायै [१३]नमः चामुंडाश्रीपा ७ ।। ऐशान्ये ॐ महालक्ष्म्यै [१४]नमः महालक्ष्मीश्रीपा. ८ ।। इत्यष्टौ शक्तीः पूजयेत् ।। ततः पुष्पांजलिमादाय मूलं पठित्वा

"अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥१॥"
इत्युक्त्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं
निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति
द्वितीयावरणम् ॥२॥ ततः अष्टदलाद्बहिः चतुर-
स्राभ्यंतरे प्राच्याम् ॐ वक्रतुंडाय [१५]नमः वक्रतुंडा-
श्रीपादुकां पूजयामि तर्पयामि नमस्करोमि १ ॥
आग्नेय्याम् ॐ एकदंष्ट्राय [१६]नमः एकदंष्ट्र-
श्रीपा. २ ॥ दक्षिणे ॐ लम्बोदराय [१७]नमः

लम्बोदरश्रीपा. ३ ॥ नैर्ऋत्ये ॐ विकटाय [१८]नमः विकटश्रीपा. ४ ॥ पश्चिमे ॐ धूम्रवर्णाय [१९]नमः धूम्रवर्णश्रीपा. ५ ॥ वायव्ये ॐ विघ्नराजाय [२०]नमः विघ्नराजश्रीपा. ६ ॥ उत्तरे ॐ गजाननाय [२१]नमः गजाननश्रीपा. ७ ॥ ऐशान्ये ॐ विनायकाय [२२]नमः विनायकश्रीपा० ८ ॥प्राच्ये-शानयोर्मध्ये ॐ गणपतये [२३]नम गणपतिश्री-पा० ९॥ पश्चिमनैर्ऋत्योर्मध्ये ॐ हस्तिदंताय [२४]नमः हस्तिदन्तश्रीपा. १० ॥ इति पूजयेत् ॥

ततः पुष्पांजलिमादाय मूलं पठित्वा "अभीष्ट-सिद्धिं मे देहि शरणागतवत्सल ।।भक्त्या समर्प्पये तुभ्यं तृतीयावरणार्चनम् ।।१।।" इत्युक्त्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ।। इति तृतीयावरणम् ।।३।। भूपुराद्बहिः पूर्वादिक्रमेण पूर्वे ॐ लं इन्द्राय [२५]नमः इन्द्र श्रीपादुकां पूजयामि तर्पयामि नमः १ ।। आग्नेय्याम् ॐ रं अग्नये [२६]नमः अग्निश्रीपा. २ ।। दक्षिणे ॐ मं यमाय [२७]नमः

यमश्रीपा. ३ ॥ नैर्ऋत्ये ॐ क्षं निर्ऋतये [२८]नमः निर्ऋतिश्रीपा. ४ ॥ पश्चिमे ॐ वं वरुणाय [२९]नमः वरुणश्रीपा. ५ ॥ वायव्ये ॐ यं वायवे [३०]नमः वायुश्रीपा. ६ ॥ उत्तरे ॐ कुं कुबेराय [३१]नमः कुबेरश्रीपा. ७ ॥ ऐशान्ये ॐ हं ईशानाय [३२]नमः ईशानश्रीपा. ८ ॥ इंद्रेशानयोर्मध्ये ॐ आँ ब्रह्मणे [३३]नमः ब्रह्मश्रीपा. ९ ॥ वरुणनैर्ऋतयोर्मध्ये ॐ ह्रीं अनंताय [३४]नमः अनंतश्रीपा. १० ॥ इति दशदिक्पालान्संपूज्य पुष्पांजलिमादाय मूलमु-

च्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतव-त्सल ॥ भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥१॥" इत्युक्त्वा पुष्पांजलिं च दत्त्वा विशेषार्घा-द्बिंदु निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति चतुर्थावरणम् ॥४॥ ततः पूर्वादिक्रमेण तत्तत्समीपे ॐ वं वज्राय [३५]नमः १ ॥ ॐ शं शक्तये [३६]नमः २ ॥ ॐ दं दंडाय [३७]नमः ३ ॥ ॐ खं खड्गाय [३८]नमः ४ ॥ ॐ पाँ पाशाय [३९]नमः ५ ॥ ॐ अं अंकुशाय [४०]नमः ६ ॥ ॐ गं गदायै [४१]नमः ७ ॥ ॐ

त्रिं त्रिशूलाय [४२]नमः ८ ।। ॐ पं पद्माय [४३]नमः ९ ।। ॐ चं चक्राय [४४]नमः १० ।। इत्यस्त्राणि पूजयेत् ।। ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य्य "अभीष्ट-सिद्धिं मे देहि शरणागतवत्सल ।। भक्त्या समर्पये तुभ्यं पंचमावरणार्चनम् ।।१।।" इत्युक्त्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ।। इति पञ्चमावरणम् ।।५।। इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य पिशितं वा फलं मोदकं

वा गुड़पायसं वा बलिं दद्यात् ।। तत्र मंत्रः ।। ॐ गँ हँ क्लौं ग्लौं उच्छिष्टगणेशाय महायक्षायायं बलिः इति मंत्रेण निवेदयेत् ।। ततो देवतानिवेदितं मोदकं तांबूलं वा स्वयं भुक्त्वा उच्छिष्टमुखेन जपं कुर्य्यात् ।। अस्य पुरश्चरणमेकलक्षजपः ।। तद्दशांशतस्तिलहोमः । तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि च कुर्यात् ।। एवं कृते मंत्रः सिद्धो भवति । एवं सिद्धे मंत्रे ३मंत्री प्रयोगान्साधयेत् ।। तथा च । लक्षमेकं जपेन्मंत्रं

दशांशं जुहुयात्तिलैः ॥ एवं सिद्धे मनौ मंत्री प्रयोगान्कर्तुमर्हति ॥१॥ स्वांगुष्ठप्रतिमां कृत्वा [1]कपिना [2]सितभानुना ॥ गणेशप्रतिमां रम्या-मुक्तलक्षणलक्षिताम् ॥२॥ प्रतिष्ठाप्य विधानेन मधुना स्नापयेच्च ताम् ॥ आरभ्य कृष्णभूतादिं यावच्छुक्ला चतुर्दशी ॥३॥ सगुड़ं पायसं तस्मै निवेद्य प्रजपेन्मनुम् ॥ सहस्रं प्रत्यहं तावज्जुहुया-त्सघृतैस्तिलैः ॥४॥ गणेशोहमिति ध्यायन्नुच्छिष्टे-

१ रक्तचन्दनेन । २ श्वेतार्केण वा ।

ना वृतो रहः ।। पक्षाद्राज्यमवाप्नोति नृपजोऽन्यो-
पि वा नरः ।।५।। कुलालमृत्स्नाप्रतिमा पूजितैवं
सुराज्यदा ।। वल्मीकमृत्कृता लाभमेवमिष्टान्प्रय-
च्छति।।६।।गौडी सौभाग्यदा सैवं लावणी क्षोभ-
येदरीम् ।।निंबजा नाशयेच्छत्रून्प्रतिमैवं समर्चिता
।।७।। [1]मध्वक्तैर्होमतो लाजैर्वशयेदखिलं जगत्।।सु-
प्तोधिशय्यमुच्छिष्टो जपञ्छत्रून्वशं नयेत्।।८।
कटुतैलान्वितै राजी पुष्पैर्विद्वेषयेदरीन् ।। द्यूते

१ घृतमधुशर्करात्तैः ।

विवादे समरे जप्तोयं जयमावहेत ॥९॥ कुबेरोऽस्य मनोर्जापान्निधीनां स्वामितामयात् ॥ लेभाते राज्यमनरिवानरेश बिभीषणौ ॥१०॥ रक्तवस्त्रांगरागाढ्यस्तांबूलं निस्वदञ्जपेत् ॥ यद्वा निवेदितं तस्मै मोदकं भक्षयञ्जपेत् ॥११॥ पिशितं वा फलं वापि तेन तेन बलिं हरेत् ॥ (रुद्रयामलतंत्रे प्रयोगविशेषः)। कृष्णां चतुर्थीमारभ्य यावच्छुक्ला चतुर्थिका ॥ सहस्रं प्रजपेन्नित्यं योषिन्नियमपूर्वकम् ॥ स्नापयेन्मधुना नित्यं नैवेद्यं

गुड़पायसम् ॥ भुक्तोच्छिष्टो जपेन्नित्यं गाणेशोयं सदा प्रियः ॥१२॥ श्वेतार्केणाकृतिं कृत्वा रक्तचंदनकेन वा ॥ अंगुष्ठमात्रां संस्थाप्य द्विजाग्निगुरुसन्निधौ ॥१३॥ जप्त्वा षोडशसाहस्रं सिद्धमंत्रो भवेद्ध्रुवम् ॥ सदोच्छिष्टोगणेशा नोयक्षराजेन धीमता ॥१४॥ आराधितः सोपहारैः सम्यगिष्टफलप्रदः ॥ एवं कृत्वा व्यवस्थां तु स धनेश्वरतां गतः ॥१५॥ अपामार्गसमिद्धोमैः सौभाग्यंलभते ध्रुवम् ॥ अष्टोत्तरशतैर्मंत्री एतन्मंत्रा-

भिमंत्रितैः ॥१६॥ कीशाश्वास्थिसमुद्भूतं कीलं मंत्राभिमंत्रितम् ॥ निखनेन्मंदिरेयस्य भवेदुच्चाटनं परम् ॥१७॥ मनुष्यास्थिसमुद्भूतं कीलं मंत्राभिमंत्रितम् ॥ निखनेन्मंदिरे यस्य मरणं तस्य निश्चितम् ॥१८॥ उद्धृते तु भवेत्स्वास्थ्यमिति सर्वस्य निश्चितम् ॥ यद्यन्नाम्ना जपेमंत्रं सहस्रं स वशी भवेत् ॥१९॥ पंचसाहस्रहोमेन उद्धरेच्चवरां स्त्रियम् ॥ सहस्रदशहोमेन राजा सद्यो वशी भवेत् ॥२०॥ लक्षजाप्येन राजानो द्विजलक्षाद्राज-

पंक्तयः ।। दशलक्षेण तद्राष्ट्रं वश्यं तस्य च सर्वथा ।।२१।। अणिमादिमहासिद्धिः कोटिजाप्यान्न संशयः ।। खेचरत्वं भवेन्नित्यं सर्वज्ञत्वं च जायते ।।२२।।मंत्रं लिखित्वाशिरसि कंठे वा धारयेद्धृदि। सौभाग्यं सर्वरक्षा च भवेत्तत्र सुनिश्चितम् ।।२३।। सारभूतमिदं मंत्रं न देयं यस्य कस्यचित् ।। गुह्यं सर्वागमेष्वेवं हितबुद्धया प्रकाशितम् ।।२४।। न तिथिर्न च नक्षत्रं नोपवासो विधीयते ।। यथेष्टं चिंतयेन्मंत्रं सर्वकामफलप्रदम् ।।२५।। इत्युच्छि-

ष्टगणपतिनावार्णमंत्रप्रयोगः ।।१।। अथ द्वादशा-
क्षरोच्छिष्टगणेशमंत्रप्रयोगः ।। (मंत्रमहोदधौ)
मंत्रो यथा ।।ॐ ह्रीं गँ हस्तिपिशाचिलिखे स्वा-
हा ।। अस्य श्रीद्वादशाक्षरोच्छिष्टगणेश मंत्रस्य
मनुर्ऋषिः विराट् छंदः । उच्छिष्टगणपतिर्देवता ।
गँ बीजम् । स्वाहा शक्तिः । ह्रीं कीलकम् ।
अखिलाप्तये जपे विनियोगः ।। ॐ मनुऋषये नमः
शिरसि ।।१।। ॐ विराट्छंदसे नमः मुखे ।।२।। ॐ
उच्छिष्टगणपतिदेवतायै नमः हृदि ।।३।। ॐ गँ

बीजाय नमः गुह्ये ॥४॥ ॐ स्वाहाशक्तये नमः पादयोः ॥५॥ ॐ ह्रीं कीलकाय नमः नाभौ ॥६॥ विनियोगाय नमः सर्वांगे ॥७॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रीं अंगुष्ठाभ्यां नमः ॥१॥ ॐ गँ तर्जनीभ्यां नमः ॥२॥ ॐ हस्ति मध्यमाभ्यां नमः ॥३॥ ॐ पिशाचि अनामिकाभ्यां नमः ॥४॥ ॐ लिखे कनिष्ठिकाभ्यां नमः ॥५॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः॥६॥ इति करन्यासः ॥ ॐ ह्रीं हृदयाय नमः ॥१॥ ॐ गँ शिरसे स्वाहा

॥२॥ ॐ हस्ति शिखायै वषट् ॥३॥ ॐ पिशाचि कवचाय हुं ॥४॥ ॐ लिखे नेत्र त्रयाय वौषट् ॥५॥ ॐ स्वाहा अस्त्राय फट् ॥६॥ एवं न्यासं कुर्य्यात् ॥ अन्यत्सर्वं पूर्ववत् ॥ इति द्वादशाक्षरोच्छिष्टगणेशमंत्रप्रयोगः ॥२॥ अथैकोनविंशत्यक्षरोच्छिष्टगणेशमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा ॥ ॐ नमः उच्छिष्टगणेशाय हस्तिपिशाचि लिखे स्वाहा ॥ इत्येकोनविंशत्यक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य श्रीमदेकोन

विंशत्यक्षरोच्छिष्टगणेशमंत्रस्य कंकोल ऋषिः। विराट्छन्दः। उच्छिष्टगणपतिर्देवता। अखिलाप्तये जपे विनियोगः॥ ॐ कंकोलऋषये नमः शिरसि १॥ ॐ विराट्छन्दसे नमः मुखे २॥ ॐ उच्छिष्टगणपतिदेवतायै नमः हृदि ३॥ ॐ विनियोगाय नमः सर्वांगे ४॥ इति ऋष्यादिन्यासः॥ ॐ नमः[६] अंगुष्ठाभ्यां नमः १॥ ॐ उच्छिष्टगणेशाय तर्जनीभ्यां नमः २॥ ॐ हस्ति मध्यमाभ्यां नमः ३॥ ॐ पिशाचि अनामिकाभ्यां

नमः ४ ॥ ॐ लिखे कनिष्ठिकाभ्यां नमः ५ ॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ नमः हृदयाय नमः १ ॥ ॐ उच्छिष्टगणेशाय शिरसे स्वाहा २ ॥ ॐ हस्ति शिखायै वषट् ३ ॥ ॐ पिशाचि कवचाय हुं ४ ॥ ॐ लिखे नेत्रत्रयाय वौषट् ५ ॥ ॐ स्वाहा अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कुर्य्यात् । अन्यत्सर्वं पूर्ववत् ॥ इत्येकोनविंशत्यक्षरोच्छिष्टगणेशमंत्रप्रयोगः ॥३॥ अथ सप्तत्रिंशद-

क्षरोच्छिष्टगणेशमंत्रप्रयोगः ।। मंत्रो यथा ।। "ॐ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आँक्रोंह्रींगं घे घे स्वाहा" इति सप्तत्रिंशदक्षरो मंत्रः ।। अस्य विधानम् ।। अस्य श्रीसप्तत्रिंशाक्षरोच्छिष्टगणेशमंत्रस्य गणक ऋषिः । गायत्री छन्दः । उच्छिष्टगणपतिर्देवता । गँ बीजम् । ह्रीं शक्तिः । आँ क्रों कीलकम् । ममाभीष्टसिद्धये जपे विनियोगः ।। ॐ गणकर्षये नमः शिरसि १ ।। ॐ गायत्री छन्दसे नमः मुखे २ ।। ॐ

उच्छिष्टगणपतिदेवतायै नमः हृदि ३ ॥ ॐ गँ बीजाय नमो गुह्ये ४ ॥ ॐ ह्रीं शक्तये नमः पादयोः ५ ॥ ॐ आँ क्रों कीलकाय नमो नाभौ ६ ॥ ॐ विनियोगायनमः सर्वांगे ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ नमो भगवते एकदंष्ट्राय अंगुष्ठाभ्यां नमः १ ॥ हस्तिमुखाय तर्जनीभ्यां नमः २ ॥ ॐ लम्बोदराय मध्यमाभ्यां नमः ३ ॥ ॐ उच्छिष्टमहात्मने अनामिकाभ्यां नमः ४ ॥ ॐ आँक्रोंह्रीं गँ कनिष्ठिकाभ्यां नमः ५ ॥ ॐ घे घे

स्वाहा करतलकरष्टष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ नमो भगवते एकदंष्ट्राय हृदयाय नमः १ ॥ ॐ हस्ति मुखाय शिरसे स्वाहा २ ॥ ॐ लंबोदराय शिखायै वषट् ३ ॥ ॐ उच्छिष्टमहा-त्मने कवचाय हुं ४ ॥ ॐ आँक्रोंह्रींगँ नेत्रत्रयाय वौषट् ५ ॥ ॐ घे घे स्वाहा अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं एन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ ॐ शरान्धनुः पाशसृणी स्वहस्तैर्दधानमारक्तसरोरुहस्थम् ॥

विवस्त्रपत्न्यां सुरतप्रवृत्तमुच्छिष्टमम्बासुतमाश्रयेऽहम् ॥१॥ एवं ध्यात्वा पूर्वोक्तपीठपूजां विधाय पूर्वोक्ता वरणपूजां च कृत्वा जपं कुर्य्यात् ॥ अस्य पुरश्चरणमेकलक्षजपः । तद्दशांशतो घृतहोमः।तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि च कुर्यात् । एवं कृते मंत्रः सिद्धो भवति ॥ सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च । लक्षं जपेद्घृतैर्हुत्वा तद्दशांशं प्रपूजयेत् ॥ पूर्वोक्तपीठे स्वाभीष्टसिद्धये पूर्ववद्विभुम्॥१।कृष्णाष्टम्यादि

भूतांत यावत्तावज्जपेन्मनुम्।।प्रत्यहं साष्टसाहस्रं जुहुयात्तद्दशांशतः ।।२।। तर्पयेदपि मंत्रोयं सिद्धि-मैवं प्रयच्छति ।। धनं धान्यं सुतान्पौत्रान्सौभाग्य-मतुलं यशः ।।३।। मूर्तिं कुर्याद्गणेशस्य शुभाहे निम्बदारुणा ।। प्राणप्रतिष्ठां कृत्वाथ तदग्रे मंत्रमाजपेत् ।।४।। यं ध्यात्वा दासवत्सोऽपि वश्यो भवति निश्चितम् ।। नदीजलं समादाय सप्तविंशतिसंख्यया ।।५।। मंत्रयित्वा मुखं तेन प्रक्षाल्येशसभां व्रजेत् ।। पश्येद्यं दृश्यते येन स

वश्यो जायते क्षणात् ॥६॥ चतुःसहस्रं धत्तूरपुष्पा-
णि मनुनार्पयेत् ॥ गणेशाय नृपादीनां जनानां
वश्यताकृते ॥७॥ सुंदरीवामपादस्य रेणुमादाय
तत्र तु ॥ संस्थाप्य गणनाथस्य प्रतिमां प्रजपेन्म-
नुम् ॥८॥ तां ध्यात्वा रविसाहस्रं सा समायाति
दूरतः ॥ श्वेतार्केणाथ निम्बेन कृत्वा मूर्तिं धृतां
शुकाम् ॥९॥ चतुर्थ्यां पूजयेद्रात्रौ रक्तैः कुसुम-
चन्दनैः ॥ जप्त्वा सहस्रं तां मूर्तिं क्षिपेद्रात्रौ स-
रित्तटे ॥१०॥ स्वेष्टं कार्यं समाचष्टे स्वप्ने तस्य

गणाधिपः ॥ सहस्रं निम्बकाष्ठानां होमादुच्चाटयेदरीन् ॥११॥ [1]वजिणासमिधा होमाद्रिपुर्यमपुरं व्रजेत् ॥ वानरस्यास्थि संजप्तं क्षिप्तमुच्चाटयेद्गृहे ॥१२॥ जप्तं नरास्थि कन्याया गृहे क्षिप्तं तदाप्तिकृत् ॥ कुलालस्य मृदा स्त्रीणां वामपादस्य रेणुना ॥१३॥ कृत्वा पुत्तलिकां तस्या हृदि स्त्रीनाम संलिखेत् ॥ निखनेन्मंत्रसंजप्तैर्निम्बकाष्ठैः क्षिताविमाम् ॥१४॥ सोन्मत्ता भवति

१ हुरहुर ।

क्षिप्रमुद्धृतायां सुखं भवेत् ॥ शत्रोरेवं कृता सा तु लशुनेन समाचिता ॥१५॥ शरावान्तगता सम्यक्पूजिता द्वारि विद्विषः ॥ निखाता पक्षमात्रेण शत्रूच्चाटनकृत्स्मृता ॥१६॥ विषमे समनुप्राप्ते सितार्कारिष्टदारुजम् ॥ गणपं पूजितं सम्यक्कुसुमै रक्तचन्दनैः ॥१७॥ मद्यभाण्डस्थितं हस्तमात्रे तं निखनेत्स्थले ॥ तत्रोपविश्य प्रजपेन्मंत्री नक्तं दिवा मनुम् ॥१८॥ सप्ताहमध्ये

यांति वर्द्धते धनसंपदः ॥१९॥ दुष्टस्त्रीवामपादस्य रजसा निजदेहजैः ॥ मलैर्मूत्रपुरीषाद्यैः कुंभकारमृदापि च ॥२०॥ एतैः कृत्वा गणेशस्य प्रतिमां मद्यभाण्डगाम् ॥ संपूज्य निखनेद्भूमौ हस्तार्द्धे पूरिते पुनः ॥२१॥ संस्थाप्य वह्नि जुहुयात्कुसुमैर्हयमारजैः[1] ॥ सहस्रंसा भवेद्दासी तन्वा च मनसा धनैः ॥२२॥ एवमादिप्रयोगांस्तु नवार्णेनापि साधयेत् ॥ परीक्षिताय शिष्याय

१. करवीरोद्भवैः ।

प्रदेया निजसूनवे ॥२३॥ इति सप्तत्रिंशदक्षरमंत्र-
प्रयोगः ॥ (प्रकारांतरेणैकाधिकचत्वारिंशदक्षर
मंत्रभेदो रुद्रयामलतंत्र) मंत्रो यथा ॥ ॐ नमो
भगवते एकदंष्ट्राय हस्तिमुखाय लंबोदराय
उच्छिष्टमहात्मने आँ क्रोंह्रीं गँ घे घे उच्छिष्टाय
स्वाहा ॥इति मंत्रः॥अस्य श्रीमदुच्छिष्टमहागण-
पतिमंत्रस्य मतंगभगवान् ऋषिः। गायत्री छंदः।
उच्छिष्टमहागणपतिर्देवता। गं बीजम्। स्वाहा
[illegible] । [illegible] जपे

विनियोगः ।। इति विनियोगं कुर्यात् ।। अन्यत्सर्वं पूर्ववत् ।। (मन्त्रमहोदधौ) द्वात्रिंशदक्षरमंत्रभेदः ।। मंत्रो यथा ।। ॐ हस्तिमुखाय लम्बोदराय उच्छिष्ट महात्मने आँ क्रों ह्रीं क्लीं ह्रीं हुँ घे घे उच्छिष्टाय स्वाहा ।। अस्य श्रीमदुच्छिष्टगणपति-मंत्रस्य गणक ऋषिः गायत्री छंदः । उच्छिष्टगण-पतिर्देवता । ममाभीष्टसिद्धये जपे विनियोगः ।। ॐ गणकऋषये नमः शिरसि ।।१।। ॐ गायत्री-छंदसे नमः मुखे ।।२।। ॐ उच्छिष्टगणपतिदेवता-

यै नमः हृदि ॥३॥ विनियोगायनमः सर्वांगे॥४॥
इति ऋस्यादिन्यासः ॥ ॐ हस्तिमुखाय अंगुष्ठा-
भ्यां नमः ॥१॥ ॐ लम्बोदराय तर्जनीभ्यां नमः
॥२॥ ॐ उच्छिष्टमहात्मने मध्यमाभ्यां नमः
॥३॥ आँ क्रों ह्रीं क्लीं ह्रीं हुँ अनामिकाभ्यां नमः
॥४॥ घे घे उच्छिष्टाय कनिष्ठिकाभ्यां नमः
॥५॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥६॥
इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं च
कुर्यात ॥ अन्यत्सर्वं पूर्ववत ॥ तथा च ॥ द्वात्रिं-

शदक्षरो मंत्रो यजनं पूर्ववत्स्मृतम् ।। उच्छिष्टगज-
वक्त्रस्य मंत्रेष्वेषु न शोधयेत्।।१।।सिद्धादिचक्रमा-
सादेः प्राप्तास्ते सिद्धिदा गुरोः ।। मनवोमी सदा
गोप्या न प्रकाश्या यतः कुतः ।। परीक्षिताय
शिष्याय प्रदेया निजसूनवे ।।२।। इति ।।
अथैकत्रिंशदक्षर मंत्रभेदः ।। मंत्रो यथा ।। ॐ नमो
हस्तिमुखाय लंबोदराय उच्छिष्टमहात्मने क्राँ क्रीं
ह्रीं घे घे उच्छिष्टाय स्वाहा ।। अस्य विधानम् ।।
कटुनिंबमूलस्यपर्वमानां गणेशप्रतिमां कृत्वा

कृष्णाष्टमीमारभ्यामावास्यापर्यंतं पंचशतसं-
ख्याकं जपं प्रतिदिनं कुर्यात् ।। स्वयमुच्छिष्टमुखो
भूत्वा गणेशाग्रे स्थाल्यां रक्तचन्दनाक्षतपुष्पाणि
धृत्वा समभ्यर्च्य स्वेच्छिष्टमुखेन जपः कर्तव्यः।।
एवं दिन सप्तकं कृत्वाष्टमेदिवसे स्वयमुच्छिष्टमु-
खोभूत्वैव पञ्चखाद्येन पंचशतं जुहुयात् ।। ततोभि-
लषितं ददाति महिमा भवति ।।१।। अभिलषित-
बालाचित्रोपरि गणेशं संस्थाप्य प्रत्यहमष्टोत्तर-
शतं जपेत् ।।

पाले संस्थाप्य सा पुनर्गच्छति ॥ पुनरानयनाया-
ष्टोत्तरशतंजपेत् ॥ यदि सा पुनर्नायाति तर्हि
॥२॥ तं गणेशमुच्छिष्टमुखाग्रे निधायाष्टोत्तर-
शतं जपेत् । राजा वशी भवति ॥३॥ तं गणेशं
नद्यां नीत्वा प्रक्षाल्य स्वमुखाद्वारचतुष्टयं प्रक्षा-
ल्य तस्मात् पतितं किंचिदुदकं भांडे निक्षिपेत् ।
तदुदकं ये पिबंति ते सर्वे वश्या भवंति ॥४॥ तं
गणेशं द्वारे तरुवरशाखायां निक्षिप्य संपूज्याष्टो-
त्तरशतं जपेत् गृहे ह्यखण्डितमन्नं भवति ॥५॥

गणेशं ताम्रे रौप्ये वा निक्षिप्य कटिबंधनात्स्त्रियो वश्या भवन्ति । शत्रुगणः स्तंभीभवति ॥६॥ तं गणेशं करतले धृत्वा कनकपुष्पैरर्चयेत् पश्चात्करेण करवालं धृत्वा दशशतं जपति तदा संग्रामे जयो भवति ॥७॥ तं गणेशमन्नोपरि संस्थाप्याष्टोत्तरशतं जपेत् । उदरपूरणार्थमन्नप्राप्तिर्भवति ॥८॥ तं गणेशं पाणौ प्रक्षाल्य तदुदकपानाच्छत्रुनामग्रहणाद्वि पुनाशः स्यात् ॥९॥ इत्येकाधिकत्रिंशदक्षरोक्तिष्टगणेशमंत्रप्रयोगः ॥ इति श्रीमद्-

च्छिष्टगणपत्युपासनापञ्चरत्ने श्रीमदुच्छिष्टगण-
पति पटलनिरूपणंनाम प्रथमं रत्नम् ॥१॥ अथ
श्रीमदुच्छिष्टगणपतिपूजापद्धतिः ॥ तत्रादौ
पूर्वकृत्यम् ॥ पुरश्चरणात्प्राक्तृतीयदिवसे क्षौरा-
दिकं विधाय ततः प्रायश्चित्तांगभूतविष्णुपूजां
विष्णुतर्पणं विष्णुश्राद्धं होमं चांद्रायणादि व्रतं च
कुर्यात् । व्रताशक्तौ गोदानं द्रव्यदानं च कुर्यात् ।
यदि सर्वकर्माशक्तस्ततः प्रायश्चित्तांगभूतपंचगव्य-
प्राशनं कुर्यात् । तत्र मन्त्रः । "यत्त्वगस्थिगतं पापं

देहे तिष्ठति मामके । प्राशनात्पंचगव्यस्य दहत्य-
ग्निरिवेन्धनम् ॥१॥" इति पठित्वा प्रणवेन पंच-
गव्यं पिबेत्।तद्दिने उपवासं कृत्वा अशक्तश्चेत्पयः
पानं हविष्यान्ने नैकभक्तव्रतं कृत्वा ततः पुरश्चर-
णात्पूर्वदिने स्वदेहशुद्ध्यर्थं पुरश्चरणाधिकारप्रा-
प्त्यर्थं चायुतगायत्रीजपं कुर्यात् ॥ तद्यथा ।
देशकालौ संकीर्त्यज्ञाताज्ञातपापक्षयार्थंकरिष्यमा-
णोच्छिष्टगणेशपुरश्चरणाधिकारार्थममुकमंत्रेण

संकल्प्य गायत्र्ययुतं जपेत् । ततः गायत्र्या आचार्य्यऋषिं विश्वामित्रं तर्पयामि १ गायत्रीछंदस्तर्पयामि २ सवितारं देवतां तर्पयामि ३ इति तर्पणं कृत्वा ततोस्यां रात्रौ देवतोपास्तिं शुभाशुभ स्वप्नं विचारयेत् ।। तद्यथा । स्नानादिकं कृत्वा हरिपादांबुजं स्मृत्वा कुशासनादिशय्यायां यथा सुखं स्थित्वा वृषभध्वजं प्रार्थयेत् ।। तत्र मंत्रः ॐ "भगवन्देवदेवेश शूलभृद्वृषवाहन ।। इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शाश्वत ।।१।। ॐ नमो ऽ-

जाय त्रिनेत्राय पिंगलाय महात्मने ॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥२॥ स्वप्नेकथय मे तथ्यं सर्वकार्येष्वशेषतः ॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥३॥" इति मंत्रेणाष्टोत्तरशतवारं शिवं प्रार्थ्य निद्रां कुर्यात् ॥ ततः स्वप्न दृष्टं निशि प्रातर्गुरवे विनिवेदयेत् । अथवा [1]स्वयं स्वप्नं विचारयेत् । इति पूर्वकृत्यम् ।

१ लिंग चंद्रार्कयोर्बिंबं भारतीं जाह्नवीं गुरुम् । रक्ताब्धितरण युद्धे

ततश्चन्द्रतारादिबलान्विते सुमुहूर्ते विविक्ते देशे जपस्थानं प्रकल्प्य पुरश्चरणदिवसे ब्राह्मे मुहूर्ते चोत्थाय प्रातः स्मरणं कुर्यात् ।। अथ गणेशप्रातः

आरोहणं सारसस्य धरालाभश्च निम्नगाम् । प्रासादः स्पंदनं पद्मं छत्र कन्या द्रुमः फली । नागो दीपो हयः पुष्पं वृषभोऽश्वश्च पर्वतः ।। सुराघटो ग्रहस्तारा नारी सूर्योदयोऽप्सराः ।। हर्म्यशैलविमानानामारोहो गगने गमः ।। मद्यमांसादनं विष्ठालेपो रुधिरसेचनम् । दद्धचोदनादनं राज्याभिषेको गोवृषध्वजाः ।। सिंहः सिंहासनं शंखो वादिबं रोचनादिभिः । चंदनं तर्पणं चैषांस्वप्ने वै दर्शनं शुभम् ।। तैलाभ्यक्तः कृष्णवर्णो नग्नो ना गर्तवायसौ । शुष्ककटाकिवृक्षश्च चांडालो दीर्घकन्धरः । प्रासादस्तल हीनश्च नैते स्वप्ने शुभावहाः ।। इति स्वयं स्वप्नं विचारयेत् ।।

स्मरणम् ॥ "ॐ प्रातः स्मरामि गणनाथमनाथ-
बंधुं सिंदूरपूर्णपरिशोभितगंडयुग्मम् ॥ उद्दण्ड-
विघ्नपरिखण्डनचण्डदण्डमाखण्डलादिसुरनाय-
कवृन्दवंद्यम् ॥१॥ प्रातर्नमामि चतुराननवंद्य-
मानमिच्छानुकूलमखिलं च वरं ददानम् ॥ तं
तुन्दिलं द्विरसनाधिपयज्ञसूत्रं पुत्रं विलासचतुरं
शिवयोः शिवाय ॥२॥ प्रातर्भजाम्यभयदं
खलुभक्तशोकदावानलंगणविभुंवरकुंजरास्यम् ॥

सुत मीश्वरस्य ॥३॥" श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ॥ प्रातरुत्थाय सततं यः पठेत्प्रयतःपुमान् ॥४॥ इति स्मरणं कृत्वा भूमिं प्रार्थयेत् । तत्रमंत्रः । "समुद्रमेखले देविपर्वतस्तन-मंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥१॥ इति भूमिं संप्रार्थ्य श्वासानुसारेण भूमौपादं दत्त्वा बहिर्व्रजेत् ॥ इति प्रातःकृत्यम् । ततो ग्रामाद्बहिर्नैर्ऋत्यकोणे जनवर्जिते उत्तराभि-मुखः अनुपानत्को वस्त्रेण शिरः प्रावृत्य मलमोचनं

कृत्वा मृत्तिकया जलेन च यथा संख्यंशौचं कृत्वाहस्तौ पादौ प्रक्षाल्य गंडूषं कृत्वा दंतधावनं च कुर्यात् ।। तद्यथा ।। आम्रचंपकापामार्गद्यन्यतमं द्वादशांगुलं दंतकाष्ठं गृहीत्वा प्रार्थयेत् । तत्र मंत्रः । "आयुर्बलं यशोवर्चः प्रजापशुधनानि च श्रियं प्रज्ञां च मेधां च त्वं नो देहि वनस्पते।।१।। इति संप्रार्थ्य ॐ ह्रीं तडित्स्वाहा इति मंत्रेण काष्ठं छित्त्वा ॐ क्लीं कामदेवाय सर्वजनप्रियाय नमः इत्यनेन दंतान् संशोध्य ऐं इति बीजेन

जिह्वामुल्लिख्य दंतकाष्ठं क्षालयित्वा नैर्ऋत्येशुद्ध-देशे निक्षिपेत् मूलेन मुखं प्रक्षाल्याचम्य स्नानं कुर्यात् ॥ इति शौचक्रिया ॥ ततः तीर्थस्नानं मंगलस्नानं च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा गृहस्नानं कुर्यात् । अथ गृहस्नानप्रयोगः ॥ तात्का-लिकोद्धृतोदकेन उष्णोदकेन वा कृत्वा न तु पर्युषितशीतोदकेन ताम्रादिबृहत्पात्रे जलं गृहीत्वा तीर्थान्यावाहयेत् ॥ तत्रमंत्रः ॥ "गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधु

कावेरिजलेऽस्मिन्सन्निधिं कुरु ॥१॥ ॐ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ आगच्छन्तु पवित्राणि स्नान काले सदा मम ॥२॥ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥३॥" इति तीर्थान्यावाह्य ॥ ऋतं च सत्यमिति मन्त्रेणाभिमंत्र्य स्नानं कुर्य्यात् ॥ एवं स्नानं कृत्वा शुष्कं शुभ्रं रक्तं वा कार्पासवस्त्रं परिधाय सूर्यायार्घ्यं दद्यात्॥ तत्र मंत्रः ॥ "एहि सूर्य्य सहस्रांशो तेजोराशे ज-

गत्पते।।अनुकंपय मां देव गृहाणार्घ्यं नमोस्तुते।।"
इत्यर्घ्यं दत्त्वा स्नानवस्त्रं परिपीडय आचम्य
पंचत्रिपुंड्रं कृत्वा रुद्राक्षमालां धारयेत् ।। ततो
जपस्थाने गत्वा नित्यनैमित्तिकं समाप्य अश्वत्थो-
दुम्बरप्लक्षानामन्यतमान् वितस्तिमात्रान् दश
कीलान् ।। ॐ नमः सुदर्शनायास्त्राय फट् इति
मंत्रेणाष्टोत्तरशताभिमंत्रितान् ।। "ॐ ये चात्र
विघ्नकर्तारो भुवि दिव्यंतरिक्षगाः ।। विघ्नभूताश्च
ये चान्ये मम मंत्रस्य सिद्धिषु ।।१।। मयैतत्कीलितं

क्षेत्रं परित्यज्य विदूरतः ॥ अपसर्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥२॥" इति मंत्रद्वयेन दशदिक्षु दश कीलान् निखनेत् ॥ ततस्तेषु ॥ ॐ सुदर्शनायास्त्राय फट् ॥ इति मंत्रेण प्रत्येकं कीलान् संपूज्य तद्बाह्ये भूतबलिं दद्यात् ॥ तत्र मंत्रः ॥ "ये रौद्रकर्माणो रौद्रस्थाननिवासिनः ॥ मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये ॥१॥ विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः ॥ ते सर्वे प्रीतमनसः प्रतिगृह्णंत्विमं बलिम् ॥२॥ इतिमंत्र-

येन दशदिक्षु बाह्ये माषभक्तबलिं दद्यात् ॥ इति भूतेभ्यो बलिं दत्त्वा हस्तौ पादौ प्रक्षाल्याचामेत् ॥ ततः "ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥१॥" इति मंत्रेणमंडपांतरं प्रोक्ष्य तत्र तावत् आसनभूमौ कूर्मशोधनं कार्यम् ॥ यत्र जपकर्ता एक एव तदा कूर्ममुखे उपविश्य जपं तत्रैव दीपस्थानं च कुर्यात् ॥ यत्र बहवः जापकास्तत्र कूर्ममुखोपरि दीपमेव स्थापयेत् ॥ एवं

कूर्मशोधनं विधाय तत्रासनाधो जलादिना त्रिकोणं कृत्वा तत्र ।। ॐ कूर्माय नमः ।। ॐ ह्रीं आधारशक्तिकमलासनाय नमः ।। ॐ पृथिव्यै नमः ।। इति गंधाक्षतपुष्पैः संपूज्य तदुपरिकुशासनं तदुपरि मृगाजिनं तदुपरि कंबलाद्यासनमास्तीर्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण ॐ अनंतासनाय नमः ।।१।। ॐ विमलासनाय नमः ।।२।। ॐ पद्मासनाय नमः ।।३।। इति मंत्रत्रयेण त्रीन दर्भान प्रत्येकं

निदध्यात् ॥ एवमासनं संस्थाप्य तत्र प्राङ्मुख-
उदङ्मुखो वा उपविश्य आसनशोधनं कुर्यात् ॥
तत्र मंत्रः ॥ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः ।
कूर्मो देवता । सुतलञ्छंदः । आसने विनियोगः ॥
"ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना
धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासन-
म् ॥" इति मंत्रेण आसनं प्रोक्ष्य ॥ ततो मूलमंत्रेण
शिखां बद्धा आचम्य प्राणानायम्य देशकालौ
संकीर्त्य श्रीमदुच्छिष्टगणपतिदेवताप्रीतये अमुक-

मंत्रसिद्धये अमुकसंख्याजपं तत्तद्दशांशहोमतर्पण-
मार्जनब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये ॥

इति संकल्प्य भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृ-
काबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासं च-
सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा गणेशकलामा-
तृकान्यासं च कुर्यात् ॥ तथा च तत्र क्रमः ॥ ॐ
अस्य विघ्नेशादिकलामातृकान्यासस्य गणक-
ऋषिः । निचृद्गायत्री छन्दः । विनायको देवता ।
हलो बीजानि । स्वराः शक्तयः । सर्वेष्टसिद्धये

न्यासे विनियोगः ।। ॐ गाँ हृदयाय नमः १ ।। ॐ गीँ शिरसे स्वाहा २ ।। ॐ गूँ शिखायै वषट् ३ ।। ॐ गैं कवचाय हुं ४ ।।ॐ गौ नेत्रत्रयाय वौषट् ५।। ॐ गः अस्त्राय फट् ६ ।। एवं षडंगन्यासं कृत्वा गजाननं ध्यायेत् ।। अथ ध्यानम् ।।" गुणांकुशवराभीतिपाणिरक्ताब्जहस्तया ।। प्रिययालिंगितं रक्तं त्रिनेत्रं गणपं भजे ।।१।।" एवं ध्यात्वा न्यासं कुर्य्यात् ।। तथा च तत्र क्रमः ।। ॐ अँ विघ्नेश ह्रीभ्यां नमःललाटे १ ॐ आँ विघ्नराजश्रीभ्यां

नमः मुखवृत्ते २ ॐ इँ विनायकपुष्टिभ्यां नमः
दक्षिणनेत्रे ३ ॐ ईं शिवोत्तमशान्तिभ्यां नमः
वामनेत्रे ४ ॐ उँ विघ्नकृत्स्वस्तिभ्यां नमः
दक्षिणकर्णे ५ ॐ ऊँ विघ्नहर्तृसरस्वतीभ्यां नमः
वामकर्णे ६ ॐ ऋँ गणस्वाहाभ्यां नमः दक्षिण-
नासापुटे ७ ॐ ॠँ एकदंतसुमेधाभ्यां नमः वाम-
नासापुटे ८ ॐ ऌँ द्विदंतकांतिभ्यां नमः दक्षिण-
गंडे ९ ॐ ॡँ गजवक्त्रकामिनीभ्यां नमः वामगंडे
१० ॐ एँ निरंजनमोहिनीभ्यां नमः ऊर्ध्वोष्ठे ११

ॐ ऐं कपर्दिनटीभ्यां नमः अधरोष्ठे १२ ॐ ओं दीर्घजिह्वपार्वतीभ्यां नमः ऊर्ध्व दंतपंक्तौ १३ ॐ औंशंकुकर्णज्वालिनीभ्यां नमः अधोदंतपंक्तौ १४ ॐ अँ वृषभध्वजनंदाभ्यां नमः शिरसि १५ ॐ अः गणेशसुरेशीभ्यांनमः मुखे १६ ॐ कँ गजेन्द्रकामरूपिणीभ्यां नमः दक्षिणबाहुमूले १७ ॐ खँ शूर्पकर्णोमाभ्यां नमः दक्षिणकूर्परे १८ ॐ गँ त्रिलोचनतेजोवतीभ्यां नमः दक्षिणमणिबंधे १९ ॐ घँ लम्बोदरसत्याभ्यां नमः दक्षांगुलिमूले

२० ॐ डँ महानंदविघ्नेशीभ्यां नमः दक्षांगुल्यग्रे
२१ ॐ चँ चतुर्मूर्तिस्वरूपिणीभ्यां नमः वाम-
बाहुमूले २२ ॐ छँ सदाशिवकामदाभ्यां नमः
वामकूर्परे २३ ॐ जँ आमो दमनजिह्वाभ्यां नमः
वाममणिबंधे २४ ॐ झँ दुर्मुखभृतिभ्यां नमः
वामांगुलिमूले २५ ॐ ञँ सुमुखभौतिकाभ्यां नमः
वामांगुल्यग्रे २६ ॐ टँ प्रमोदसिताभ्यां नमः
दक्षपादमूले २७ ॐ ठँ एक पादरमाभ्यां नमः
दक्षिणजानूनि २८ ॐ डँ द्विजिह्वमहिषीभ्यां नमः

दक्षिणगुल्फे २९ ॐ ढँ शूरभंजनीभ्यां नमः दक्षि-
णपादांगुलिमूले ३० ॐ णँ वीरविकरणाभ्यां नमः
दक्षिणपादांगुल्यग्रे ३१ ॐ तँ षण्मुखभृकुटीभ्यां
नमः वामपादमूले ३२ ॐ थँ वरदलज्जाभ्यां नमः
वामजानुनि ३३ ॐ दँ वामदेवदीर्घघोणाभ्यां
नमः वामगुल्फे ३४ ॐ धँ वक्रतुंडधनुर्धराभ्यां
नमः वामपादांगुलिमूले ३५ ॐ नँ द्विरदयामिनी-
भ्यां नमः वामपादांगुल्यग्रे ३६ ॐ पँ सेनानीरा-
त्रिभ्यां नमः दक्षिणपार्श्वे ३७ ॐ फँ कामांधग्रा-

मणीभ्यां नमः वामपार्श्वे ३८ ॐ बँ मत्तशशिप्र-
भाभ्यां नमः पृष्ठे ३९ ॐ भँ विमत्तलोललोचना-
भ्यां नमः नाभौ ४० ॐ मँ मत्तवाहनचंचलाभ्यां
नमः जठरे ४१ ॐ यँ त्वगात्मभ्यां जटिदीप्तिभ्यां
हृदि ४२ ॐ रँ असृगात्मभ्यां मुंडिसुभगाभ्यां
नमः दक्षांसे ४३ ॐ लँ मांसात्मभ्यां खडिदुर्भगा-
भ्यां नमः ककुदि ४४ ॐ वँ मेदआत्मभ्यां वरेण्य
शिवाभ्यां नमः वामांसे ४५ ॐ शँ अस्थ्यात्मभ्यां
वृषकेतनभगाभ्यां नमः हृदयादिदक्षहस्तांतम्

४६ ॐ षँ मज्जात्मभ्यां भक्तिप्रियभगिनीभ्यां नमः हृदयादिवामहस्तांतम् ४७ ॐ सँ शुक्रात्मभ्यां गणेशभोगिनीभ्यां नमः हृदयादिदक्षपादांतम् ४८ ॐ हँ प्राणात्मभ्यां मेघनादसुभगाभ्यां नमः हृदयादिवामपादांतम् ४९ ॐ लँ शक्त्यात्मभ्यां व्याप्तिकालरात्रिभ्यां नमः जठरे ५० ॐ क्षँ परमात्मभ्यां गणेश्वरकालिकाभ्यां नमः मुखे ५१ ॥ इति सर्वगणेशमंत्रांगभूतविघ्नेशादिकलामातृकान्यासः ॥ एवं कलान्यासं कृत्वा प्रयोगोक्तन्या-

सादिकं कुर्य्यात् ।। ततः पीठादौ रचिते सर्वतो-
भद्रमंडले गणेशमंडले वा मंडूकादिपरतत्त्वांतपीठ-
देवताः स्थापयेत् ।। तथा च ।। पुष्पाक्षतानादाय
स्ववामभागे श्रीगुरुभ्यो नमः १ दक्षिणे गणपतये
नमः २ मध्ये स्वेष्टदेवतायै नमः ३ इति नत्वा
पीठमध्ये ॐ मंडूकाय नमः ४ ॐ कँ कालाग्निरु-
द्राय नमः ५ ॐ आँ आधारशक्तये नमः ६ ॐ कूँ
कूर्म्माय नमः ७ ॐ अँ अनंताय नमः ८ ॐ पृँ

रँ रत्नद्वीपाय नमः ११ ॐ रँ रत्नमंडपाय नमः १२ कँ कल्पवृक्षाय नमः १३ ॐ रं रत्नवेदिकायै नमः १४ ॐ रं रत्नसिंहासनाय नमः १५ इत्युपर्युपरि संपूज्य ॥ आग्नेय्याम् ॐ धँ धर्म्माय नमः १६ नैर्ऋत्यां ॐ ज्ञाँ ज्ञानाय नमः १७ वायव्ये ॐ वैं वैराग्याय नमः १८ ऐशान्ये ॐ ऐं ऐश्वर्याय नमः १९ पूर्वे ॐ अँ अधर्माय नमः २० दक्षिणे ॐ अँ अज्ञानाय नमः २१ पश्चिमे ॐ अँ अवैराग्याय नमः २२ उत्तरे ॐ अँ अनैश्वर्याय नमः २३ इति पूजयेत्

ततः पुनः पीठमध्ये ।। ॐ आँ आनंदकंदाय नमः २४ ॐ सँ संविन्नालाय नमः २५ ॐ सँ सर्वतत्त्वक-मलासनायनमः २६ ॐ प्रँ प्रकृतिमयपत्रेभ्यो नमः २७ ॐ विं विकारमयकेसरेभ्यो नमः २८ ॐ पँ पंचाशद्वर्णाढ्यकर्णिकाभ्योनमः २९ ॐ अँ अर्कमं-डलाय द्वादशकलात्मने नमः ३० ॐ सोँ सोम-मंडलाय षोडशकलात्मनेनमः ३१ ॐ वँ वह्नि-मण्डलाय दशकलात्मने नमः ३२ ॐ सँ सत्त्वाय नमः ३३ ॐ रँ रजसे नमः ३४ ॐ तँ तमसे नमः

नमः ३३ ॐ २ रजसे नमः ३४ ॐ त तमसे नमः

३५ ॐ आँ आत्मने नमः ३६ ॐ पँ परमात्मने नमः ३७ ॐ अँ अन्तरात्मने नमः ३८ ॐ ह्रीं ज्ञानात्मने नमः ३९ ॐ मँ मायातत्त्वाय नमः ४० ॐ कँ कलातत्त्वाय नमः ४१ ॐ विं विद्यातत्त्वाय नमः ४२ ॐ पँ परतत्त्वाय नमः ४३ ॥ एवं पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् ॥ तद्यथा । पूर्वे ॐ तीव्रायै नमः १ आग्नेय्यां ॐ चालिन्यैनमः २ दक्षिणे ॐ नंदायै नमः ३ नैर्ऋत्ये ॐ भोगदायै नमः ४ पश्चिमे ॐ कामरूपिण्यै नमः

५ वायव्ये ॐ उग्रायै नमः ६ उत्तरे ॐ तेजोवत्यै नमः ७ ऐशान्ये ॐ सत्यायै नमः ८ पीठमध्ये ॐ विघ्ननाशिन्यै नमः ९ ॥ इति पीठशक्तीः संपूज्य पात्रासादनं कुर्यात् ॥ अथ पात्रासादनप्रयोगः ॥ तत्र पात्रासादनं सर्वदेवोपयोगिपद्धतिमार्गेण स विस्तरं कृत्वा अशक्तश्चेत्साधारणं कुर्यात् ॥ तत्र क्रमः ॥ तत्रादौ गंधाक्षतादिपूजोपकरणानि स्वदक्षिणपार्श्वे संस्थाप्य जलार्थं बृहत्पात्रं व्यजनं स्वादर्शचामरादीनि वामपार्श्वे स्थापयित्वा कलश-

स्थापनं कुर्यात् ।। अथ कलशस्थापनप्रयोगः ।। स्ववामभागे त्रिकोणमंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतर्मायां विलिख्य ।। ॐ ह्रींआधारशक्त्यै नमः इति संपूज्य ततो मूलेन नमः इति त्रिपदाधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य तत्र सुदर्शनायास्त्राय फट् इति मंत्रेण कलशं प्रक्षाल्य आधारोपरि हस्तद्वयेन संस्थाप्य रक्तवस्त्र माल्यादिना भूषयित्वा मूलेन नमः इति जलेनापूर्य ।। ॐ भूर्भुवः स्वः वरुण इहागच्छ इह तिष्ठ ।। इति

वरुणमावाह्य स्वेष्टदेवं ध्यात्वा गंधपुष्पैः संपूजयेत् ॥ इति कलशस्थापनम् ॥ अथ शंखस्थापनप्रयोगः ॥स्वदक्षिणे कलशोक्तविध्यनुसारेणाधारं संस्थाप्य ॐ सुदर्शनायास्त्राय फट् ॥ इति शंखं प्रक्षाल्य आधारोपरि संस्थाप्य मूलेन नमः इति जलेनापूर्य ॥ प्रणवेन गंधादिभिः संपूज्याभिमंत्रयेत् ॥ "ॐ शंखादौ चन्द्र दैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिश्चैवमग्रे गंगा

सरस्वती ॥१॥ त्रैलोक्ये तानि तीर्थानि वासु-
देवस्य चाज्ञया ॥ शंखे तिष्ठंति विपेन्द्र तस्मा-
च्छंखं प्रपूजयेत् ॥" इत्यभिमंत्र्य प्रार्थयेत् ॥ "ॐ
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥
निर्मितः सर्वदेवैश्च पांचजन्य नमोऽस्तु ते ॥२॥
पांचजन्याय विद्महे पावमानाय धीमहि ॥ तन्नः
शंखः प्रचोदयात् ॥" इति प्रार्थ्य शंखमुद्रांप्रदर्श-
येत् । इति शंखस्थापनम् ॥ अथ घंटास्थापनप्र-
योगः ॥ स्ववामभागे घंटां संस्थाप्य । "आगमार्थं

तु देवानां गमनार्थं तु रक्षसाम्।।घंटानादं प्रकुर्वीत पश्चाद्घंटां प्रपूजेत् ।।१।।" ॐ भूर्भुवः स्वः गरुड़ाय नमः आवाहयामि सर्वोपचारार्थं गंधाक्षतपुष्पाणि समर्प्पयामि नमस्करोमि ।। इत्यावाह्य ।। "ॐ जगद्धनिमंत्रमातः स्वाहा।।" इति मंत्रेण घंटा स्थितगरुड़ं घंटां च संपूज्य प्रणम्य गरुड़मुद्रां प्रदर्शयेत् ।। इति घंटास्थापनम् ।। ततः शंखात्पूर्वादिप्रादक्षिण्येन पाद्यार्घ्याचमनीयमधुपर्कस्नानार्थं पंचपात्राणि

न्यविधिना पूजयेत् ।। एवं पूजापात्राणि संपाद्य ।। प्रयोगोक्ते यंत्रे मूर्तौ वा अग्न्युत्तारणपूर्वकं प्राणान्प्रतिष्ठापयेत् ।। अथ प्राणप्रतिष्ठाप्रयोगः ।। आचम्य देशकालौ संकीर्त्य ममेत्यादि अमुकगणपतिदेवतानूतनयंत्रे (मूर्तौ वा) प्राणप्रतिष्ठां करिष्ये ।। इति संकल्प्य ।। अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामानिच्छंदांसि । क्रियामयवपुःप्राणाख्या देवता। आँ बीजम् । ह्रीं शक्तिः । क्रों कीलकम् ।

अस्मिन्नूतनयंत्रे अस्यां (नूतनमूर्तौ वा) प्राणप्रतिष्ठापने विनियोगः । इति जलं क्षिपेत् ।। करेणाच्छाद्य । ॐ आँह्रीँक्रोँयँरँलँवँशँषँसँहँसः सोहँ।अस्य श्रीमदुच्छिष्टगणपतेः सपरिवारयंत्रस्य (मूर्तेर्वा) प्राण इह प्राणाः ।।१।। पुनः ॐ आँह्रीँक्रोँयँरँलँवँशँषँसँहँसः सोहँ । अस्य श्रीमदुच्छिष्टगणपतेः सपरिवारयंत्रस्य (मूर्तेर्वा) जीव इह स्थितः ।।२।। ॐ आँह्रीँक्रोँयँरँलँवँशँषँसँहँसः सोहँ । अस्य श्रीमदु-

न्द्रियाणीह स्थितानि ॥३॥ ॐ आँह्रीँक्रोँयँरँलँवँ शँषँसँहँसः सोहँ । अस्य श्रीमदुच्छिष्टगणपतेः स परिवारयंत्रस्य (मूर्तेर्वा) वाङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥४॥ इति प्राणान्प्रतिष्ठाप्य गर्भाधानादिपंचदशसंस्कारसिद्धये पंचदशप्रणवावृत्तीः कृत्वा । अनेन श्रीमदुच्छिष्टगणपतेः सपरिवारयंत्रस्य (मूर्तेर्वा) गर्भाधानादिपंचदशसंस्कारान्संपादयामि इति वदेत् ॥ एवं

प्राणप्रतिष्ठाप्रयोगः ॥ तत आवाहनादिपूजां कुर्यात् । तद्यथा ॥ अथावाहनम् । अक्षतानादाय "देवेश भक्तिसुलभ परिवारसमन्वित ॥ यावत्त्वां पूजयिष्यामि तावद्देव इहावह ॥१॥ आगच्छ भगवन्देव स्थाने चात्र स्थितो भव ॥ यावत्पूजां करिष्यामि तावत्त्वं सन्निधौ भव ॥२॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतिदेवतामावाहयामि ॥ इत्यावाहनम् ॥१॥ "तवेयं

समाकृष्टदीपवत्स्थापयाम्यहम् ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतिदेव इह तिष्ठ ॥ इति स्थापनम् ॥२॥ "अनन्या तव देवेश मूर्तिशक्तिरियं प्रभो ॥ सान्निध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्पर ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतिदेव इह सन्नि-धेहि ॥ इति सन्निधापनम् ॥३॥ "आज्ञया तव देवेश कृपांभोधे गुणांबुधे ॥ आत्मानंदैकतृप्तं त्वां निरुणध्मि पितर्गुरो ॥" मूलं पठित्वा ॐ भूर्भुवः

स्वः श्रीमदुच्छिष्टगणपतिदेव इह सन्निरुध्य ॥ इति सन्निरोधनम् ॥४॥ "अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधनस्य च ॥ यदपूर्णं भवेत्कृत्यं तदप्य-भिमुखो भव ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतिदेव इह सम्मुखो भव ॥ इति सम्मुखीकरणम् ॥५॥ "अभक्तवाङ्मनश्चक्षुः श्रोत्र-दूरातिगद्युते ॥ स्वतेजःपञ्जरेणाशु वेष्टितो भव सर्वतः ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः

गुंठनम् ॥६॥ "यस्य दर्शनमिच्छंति देवाः स्वा-
भीष्टसिद्धये ॥ तस्मै ते परमेशाय स्वागतं स्वाग-
तं च ते ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः
श्रीमदुच्छिष्टगणपतये नमः सुस्वागतं समर्पया
मि ॥ इति सुस्वागतम् ॥७॥ "देवदेव महाराज
प्रियेश्वर प्रजापते ॥ आसनं दिव्यमीशान दास्ये-
ऽहं परमेश्वर १ ॥ अपराधो भवत्येव सेवकस्य
पदे पदे ॥ कोऽपरः सहतां लोके केवलं स्वामिनं
विना ॥२॥" मूलं पठित्वा ॐ भूर्भुवः स्वः

श्रीमदुच्छिष्टगणपतये नमः आसनं समर्पयामि ॥ इत्यासनम् ॥८॥ ततः प्रार्थयेत् ॥ तत्र मंत्रः ॥ "स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः ॥ प्राकृतं त्वं च दृष्ट्वा मां बालवत्परिपालय ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः प्रार्थनां समर्पयामि नमस्करोमि ॥ इति प्रार्थना ९ ॥ अथ पाद्यादिपूजाप्रयोगः ॥ "यद्भक्तिलेशसंपर्कात्परमानंदसम्भवः ॥ तस्मै ते चर-

ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः पाद्यं समर्पयामि ॥ इति पाद्यम् ॥१०॥ "तापत्रयहरं दिव्यं परमानंदलक्षणम् ॥ तापत्रयविनिर्मुक्त तवार्घ्यं कल्पयाम्यहम् ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः इदमर्घ्यं समर्पयामि ॥ इत्यर्घः ॥११॥ "वेदानामपि देवाय वेदानां देवतात्मने ॥ आचामं कल्पयामीश शुद्धानां शुद्धि हेतवे ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः आचमनी-

यं समर्पयामि ।। इत्याचमनम् ।।१२।।इत्याचमनं दत्त्वा मधुपर्कपञ्चामृतस्नानादि च सर्वदेवोपयोगि-पद्धतिमार्गेण कुर्यात् ।। अशक्तश्चेज्जलस्नानं मधु-स्नानं शुद्धोदकस्नानं च कुर्यात् ।।तद्यथा।। "गंगासर-स्वतीरेवापयोष्णीनर्मदाजलैः ।। स्नापितोऽसिमया देव तथा शांतिं कुरुष्व मे।।१।।" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः जलस्नानं समर्पयामि ।। इति जलस्नानम् ।।१३।। "तरुपुष्पसद्भूतं सुस्वादु मधुरं मधु ।। तेजः

पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः मधुस्नानं समर्पयामि ॥ इति मधु स्नानम् ॥१४॥ "गंगासरस्वतीरेवापयोष्णी नर्मदाजलैः॥ स्नापितोऽसि मया देव तथा शांति कुरुष्व मे ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः शुद्धोदकस्नानं समर्पयामि ॥ इति शुद्धोदकस्नानम् ॥१५॥ एवं स्नानं समर्प्याचमं दद्यात् ॥ ततः । "सर्वभूषादिके साम्ये लोकलज्जा-

निवारणे ।। मयैवापादिते तुभ्यं वाससी प्रतिगृह्य-
ताम् १ ।।" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदु-
च्छिष्टगणपतये नमः रक्तवस्त्रं समर्पयामि ।। इति
रक्तवस्त्रम् ।।१६।। "नवभिस्तन्तुभिर्युक्तं त्रिगुणं
देवतामयम् ।। उपवीतं चोत्तरीयं गृहाण परमेश्वर
।।१।।" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्ट-
गणपतये नमः यज्ञोपवीतं समर्पयामि ।। इति यज्ञो-
पवीतम् ।।१७।। "श्रीखण्डं चन्दनं दिव्यं गंधाढ्यं
सुमनोहरम् ।। विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्य-

ताम् ॥१॥ " मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदु-
च्छिष्टगणपतये नमः गंधं समर्पयामि ॥ अंगुष्ठौ
कनिष्ठामूललग्नौ गंधमुद्रा ॥ इति गंधम् ॥१८॥
"अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः ॥
मया निवेदिता भक्त्या गृहाण परमेश्वर ॥१॥"
मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगण-
पतये नमः अक्षतान्समर्पयामि ॥ सर्वांगुलीभिर्द-
द्यात् ॥ इत्यक्षतान् ॥१९॥ "माल्यादीनि सुगं-
धीनि मालत्यादीनि वै प्रभो ॥ मयानीतानि

पुष्पाणि गृहाण परमेश्वर ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः रक्तपुष्पं समर्पयामि ॥ तर्जन्यावंगुष्ठमूललग्ने पुष्पमुद्रा ॥ [1]इति पुष्पम् ॥२०॥ एवं पुष्पांतं पूजयित्वा प्रयोगोक्तावरणपूजां च कृत्वा धूपादिपूजनं कुर्यात् ॥ अथ धूपादिपूजाप्रयोगः ॥ फडिति धूपपात्रं संप्रोक्ष्य नम इति गंधपुष्पाभ्यां संपूज्य पुरतो

१ पुष्पं पत्रं फलं देवेन च दद्यादधोमुखम् ॥ पुष्पांजलौ न तद्दोषस्तथा पर्य्युषितस्य च ॥

निधाय रं इति बह्निबीजेन उपरि अग्निं संस्थाप्य तदुपरि दशांगं दत्त्वा घंटां च नादयन् ।। "वनस्पतिरसोद्भूतो गंधाढ्यो गन्ध उत्तमः ।। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।१।।" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः धूपं समर्पयामि ।। इति पठित्वा देवस्य वामभागे धूपपात्रं संस्थाप्य तर्जनीमूलयो रंगुष्ठयोगो धूपमुद्रा तां प्रदर्शयेत् ।। इति धूपम् ।।२१।। ततो दीपपात्रं गोघृतेनापूर्य वर्णाक्षरतंतुभिर्वर्तिं

निक्षिप्य प्रणवेन प्रज्वाल्य घंटां वादयन् मंत्रं पठे-
त् ॥ "सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ॥
सबाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यताम्॥१।"
मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगण-
पतये नमः दीपं समर्पयामि ॥ इति पठित्वा देवस्य
दक्षिणभागे निधाय मध्यमे अंगुष्ठलग्ने दीपमुद्रा
तां प्रदर्शयेत्॥इति दीपम्॥२२॥अथ नैवेद्यम् ॥
देवस्याग्रे जलेन चतुरस्रं मंडलं कृत्वा स्वर्णादि-
निर्मितं भोजनपात्रं संस्थाप्य तन्मध्ये मोदकं गुड़-

मिश्रितपायसं वा निधाय ॐ यं इति वायुबीजेन द्वादशवाराभिमंत्रिताऽर्घजलेन संप्रोक्ष्य मूलेन संवीक्ष्य अधोमुखदक्षिणहस्तोपरि तादृशं वामं नैवेद्येनाच्छाद्य ॐ यं इति वायुबीजं षोडशधा संजप्य वायुना तद्गतदोषान् संशोष्य दक्षिणकर-तले ॐ रं इत्यग्निबीजं विचिंत्य तत्पृष्ठलग्नं वामकरतलं कृत्वा नैवेद्यं प्रदर्श्य ॐ रं इति वह्निबीजेन षोडशवारं संजप्य तदुत्पन्नाग्निना तद्दोषं दग्ध्वा वामकरतले ॐ वं इति अमृतबीजं

विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य ।। पुनः ॐ वं इति सुधाबीजं षोडशवारं जपित्वा तदुत्थामृतधारया प्लावितं विभाव्य मूलमंत्रेण प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य वामांगुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा–"सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम् ।। निवेदयामि देवेश सानुगाय गृहाण तत् ।।१।।" मूलं पठित्वा ॐ भूर्भुवः स्वः सांगाय सपरिवाराय श्रीमदुच्छिष्टग-

णपतये नमः नैवेद्यं समर्पयामि इति जलमुत्सृज्य अनामामूलयोरंगुष्ठयोगे नैवेद्यमुद्रा तां प्रदर्शये-त् ॥ इति नैवेद्यम्॥२३॥ अथांतःपटम् ॥ "ब्रह्मे-शाद्यैः सरसमभितः सोपविष्टैः समंताच्छिंजद्बाल-व्यजननिकरैर्वीज्यमानः सखीभिः ॥ नर्मक्रीडाप्रह-सनपरान्पंक्तिभोक्तॄन्हसन्वै भुंक्ते पात्रे कनकघटि-ते षड्रसाञ्छ्रीगणेशः ॥१॥ शालीभक्तं सुपक्वं शिशिरकरसितं पायसापूपसूपं लेह्यं पेयं च चोष्यं सितममृतफलं घारिकाद्यं सुखाद्यम् ॥ आज्यं

प्राज्यं सभोज्यं नयनरुचिकरं राजिकैलामरीच-
स्वादीयः शाकराजीपरिकरम मृताहारजोषं
जुषस्वः ॥२॥" इत्यंतःपटम् ॥२४॥ "नमस्ते
देवदेवेश सर्वतृप्तिकरं परम ॥ अखंडानन्दसंपूर्णगृ-
हाणजलमुत्तमम् ॥१॥" मूलं पठित्वा ॐ भूर्भुवः
स्वः श्रीमदुच्छिष्टगणपतये नमः जलं समर्पयामि
॥ इति जलम् ॥२५॥ पुनर्गंडूषार्थं जलं दत्त्वा
मूलेन शुद्धाचमनं च दद्यात् ॥ अथ तांबूलम् ॥
"एलीफलं महद्दिव्यं नागवल्लीदलैर्युतम ॥ एला-

चूर्णादिभिर्युक्तं तांबूलं प्रतिगृह्यताम् ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः तांबूलं समर्पयामि ॥ इति तांबूलम् ॥२६॥ अथ फलम् ॥ "इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेनमे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥१॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः फलं समर्पयामि ॥ इति फलम् ॥२७॥ शक्तश्चेत् क्षेत्रादिदक्षिणापर्यंतं सर्वदेवोपयोगिपद्धतिमार्गेण दत्त्वा आरात्रिकं कुर्य्यात् ॥

अथ कर्पूरारात्रिकम् ।। "कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ।। आरात्रिकमहं कुर्वे पश्य मे वरदो भव।।१।।" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः कर्पूरारात्रिकं समर्पयामि इति पठित्वा मूलेन देवोपरि नेत्रादिपादपर्यंतं नववारं त्रिवारं वा भ्रामयेत् घंटां च नादयेत् ।। इति कर्पूरारात्रिकम् ।।२८।।अथ प्रदक्षिणा ।।"यानि कानि च पापानि जन्मांतरकृतानि वै ।। तानि सर्वाणि नश्यंतु प्रदक्षिणपदे पदे ।।१।।" इति मंत्रेण तिस्रः

प्रदक्षिणा दद्यात् ।। मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः प्रदक्षिणां समर्पया - मि।। इति प्रदक्षिणा ।।२९।। अथ पुष्पांजलिः।। "नानासुगंधपुष्पाणि यथाकालोद्भवानि च ।। पुष्पांजलिं मया दत्तं गृहाण परमेश्वर ।।१।।" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीमदुच्छिष्टगणपतये नमः पुष्पांजलिं समर्पयामि ।। इति पुष्पांजलिः ।।३०।। अथ साष्टांगप्रमाणः ।। "प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ।।" इति वदन्

साष्टांगप्रमाणे नाम निवेदयेत् ॥३१॥ तत्स्तुति-
पाठेन देवं स्तुत्वा बद्धांञ्जलिपूर्वकं क्षमापयेत् ॥
"ज्ञानतोऽज्ञानतो वाथ यन्मया क्रियतेऽशिवम्॥
मम कृत्यमिदं सर्वमिति देव क्षमस्व मे ॥१॥"
अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ दासोह-
मिति मां मत्वा क्षमस्व परमेश्वर ॥२॥ अपराधो
भवत्येव सेवकस्य पदे पदे ॥कोऽपरः सहतां लोके
केवलं स्वामिनं विना ॥३॥ भूमौ स्खलितपा-
दानां भूमिरेवावलंबनम् ॥त्वयि जाता पराधानां

त्वमेव शरणं शिव ॥४॥" इति बद्धांजलिपूर्वकं क्षमापनम् ॥३२॥ अथ प्रार्थना "यदुक्तं यदि भावेन पत्रं पुष्पं फलं जलम् ॥ निवेदितं च नैवेद्यं गृहाण त्वनुकंपया ॥१॥" इति प्रार्थ्य देवस्य दक्षिणकरे किंचिज्जलं दद्यात् ॥ इति प्रार्थना ॥३३॥ ततः पश्चात्सर्वदेवोपयोगिपद्धतिमार्गेण मालायाः संस्कारान् कुर्यात् ॥ अशक्तश्चेत्साधारणसंस्कारं कुर्यात् ॥ तथा च जपमालामानीय क्वचित्पात्रे वामहस्तेनाच्छाद्य मूलेनार्घ्योदकेना-

भ्युक्ष्य "ॐ मालेमाले महामाये सर्वशक्ति स्वरू-
पिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मात्त्वं सिद्धिदा
भव ॥१॥" इत्यनेन गंधपुष्पाभ्यां संपूज्य ततो
देवतानिवेदितमोदकं तांबूलं वा स्वयं भुक्त्वा पुनः
"अविघ्नं कुरुमाले त्वं सर्वकार्येषु सर्वदा ॥" इति
मंत्रेण दक्षिणहस्ते मालामादाय हृदये धारयन् स्वे-
ष्टदेवतां ध्यात्वा मध्यमांगुलिमध्यपर्वणि संस्था-
प्य ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मंत्रार्थं

स्मरन् यथाशक्ति मूलमंत्र जपेत् ॥ जपांते- ॐ

त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥१॥" ॐ ह्री सिद्धयै नमः ॥इति मालां शिरसि निधाय गोमुखीं रहसि स्थापयेत् ॥ नाशुचिः स्पर्शयेत् । नान्यस्मै दद्यात् । अशुचिस्थानेन निधापयेत् । स्वयोनिवद्-गुप्तां कुर्यात् । ततः कवचस्तोत्रसहस्रनामादिकं पठित्वा पुनः मूलमंत्रस्य ऋष्यादिन्यासं करन्यासं हृदयादिषडंगन्यासं च कृत्वा पंचोपचारैः संपूज्य पुष्पांजलिं दद्यात्।ततः अर्घोदकेन चुलुकमादाय-

"ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।। सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः ।।१।।" ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसावाचाकर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ।। मां मदीयं च सकलं श्रीमदुच्छिष्टगणपतिदेवतायै समर्पयामि नमः ।। ॐ तत्सदिति ब्रह्मार्पणं भवतु ।।

इति देवदक्षिणकरे जपसमर्पणं जलं दत्त्वा कृतां-

ञ्जलिपूर्वकं क्षमापनं कुर्यात् ॥ अथ क्षमापनम् ॥

"आवाहनं न जानामि न जानामि विसर्जनम् ॥
पूजाभागं न जानामि त्वं गतिः परमेश्वर ॥१॥
कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥
अंतश्चरसि भूतानामिष्टत्वं परमेश्वर ॥२॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मा-
त्कारुण्यभावेन रक्षस्व परमेश्वर ॥३॥ शतयोनि-
सहस्राणां सहस्रेषु व्रजाम्यहम् ॥ तेषु चेष्टाचला
भक्तिरच्युतास्तु सदा त्वयि ॥४॥ गतं पापं गतं

दुःखं गतं दारिद्र्यमेव च ॥ आगता सुखसंपत्तिः पुण्याच्च तव दर्शनात् ॥५॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥६॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥७॥ देवो दाता च भोक्ता च देवरूपमिदं जगत्॥ देवं जपति सर्वत्र यो देवः सोहमेव हि ॥८॥ क्षमस्व देवदेवेश क्षम्यते भुवनेश्वर॥तव पादांबुजे

नित्य निश्चला भक्तिरस्तु मे" ॥९॥ इति कृतां-

जलिः प्रार्थयित्वा ततः शंखमुद्धृत्य देवोपरि भ्राम-
यित्वा ॥ "साधु वा साधु वा कर्म यद्यदाचरितं
मया ॥ तत्सर्वं कृपया देव गृहाणाराधनं मम"
॥१॥ इत्युच्चरन्देवस्य दक्षिणहस्ते किंचिज्जलं
दत्त्वा प्राग्वदर्घ्यं देवशिरसि दत्त्वा शंखं यथा
स्थाने निवेश्य मूलेन देवोच्छिष्टनैवेद्यादिकं शि-
रसि धृत्वा देवभक्तेषु विभज्य स्वयं भुक्त्वा बली-
त्यादिकं गतसारनैवेद्यं च तदुच्छिष्टभोजिने इति
निवेदयेत् ॥ अथ विसर्जनम् ॥ "गच्छगच्छपर-

स्थाने स्वस्थाने परमेश्वर ।। यं हि ब्रह्मादयो देवा न विदुः परमं पदम्" ।।१।। इत्यक्षतान्निक्षिप्य देवं स्वहृदयमध्ये स्थापयेत् ।। तद्यथा–"तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वर ।। यत्र ब्रह्मादयो देवाः सर्वे तिष्ठंति मे हृदि"।।१।। इति देवं हृदये संस्थाप्यमानसोपचारैः संपूज्य स्वात्मानं देवरूपं भावयन् यथासुखं विहरेत् ।। अयं सर्वगणपतिपूजा-क्रमः साधारणः इति श्रीमदुच्छिष्टगणपत्युपास-

निरूपणं नाम द्वितीयं रत्नम् ॥२॥ अथ श्रीमदु-
च्छिष्टगणपतिकवचम् ॥ देव्युवाच ॥देवदेव जग-
न्नाथ सृष्टिस्थितिलयात्मक ॥ विना ध्यानं विना
मंत्रं विना होमं विना जपम् ॥१॥ येन स्मरणमा-
त्रेण लभ्यते चाशु चिंतितम्॥तदेव श्रोतुमिच्छामि
कथयस्व जगत्प्रभो ॥२॥ ईश्वर उवाच ॥ शृणु
देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ॥ उच्छिष्ट-
गणनाथस्य कवचं सर्वसिद्धिदम् ॥३॥ अल्पायासै-
र्विना कष्टैर्जपमात्रेण सिद्धिदम् ॥ एकांते निर्जने-

ऽरण्ये गह्वरे च रणांगणे ॥४॥ सिंधुतीरे च गांगीये कूले वृक्षतले जले ॥ सर्वदेवालये तीर्थे लब्ध्वा सम्यग्जपं चरेत् ॥५॥ स्नानशौचादिकं नास्ति नास्ति निर्बंधनं प्रिये॥दारिद्र्यातकरं शीघ्रं सर्वतत्त्वं जनप्रिये ॥६॥सहस्रशपथं कृत्वा यदि स्नेहोस्तिमांप्रति ॥ निंदकाय कुशिष्याय खलाय कुटिलाय च ॥७॥ दुष्टाय परशिष्याय घातकाय शठाय च ॥ वंचकाय वरघ्नाय ब्राह्मणीगमनाय च

॥८॥ अशक्ताय च क्रूराय गुरुद्रोहरताय च ॥

न दातव्यं न दातव्यं न दातव्यं कदाचन॥९॥ गुरुभक्ताय दातव्यं सच्छिष्याय विशेषतः ॥ तेषां सिद्धयंति शीघ्रेण ह्यन्यथा न च सिद्धयति॥१०॥ गुरुसंतुष्टिमात्रेण कलौ प्रत्यक्षसिद्धिदम् ॥ देहोच्छिष्टैः प्रजप्तव्यं तथोच्छिष्टैर्महामनुः[1] ॥११॥ आकाशे फलदं चेदं नान्यथा वचनं मम ॥ एषा राजवती विद्या विना पुण्यं न लभ्यते ॥१२॥ अथ वक्ष्यामि देवेशि कवचं मंत्रपूर्वकम् ॥ येन विज्ञान-

१ प्रजप्तव्य इति शेषः ।

मात्रेण राजभोगफलप्रदम् ॥१३॥ ऋषिर्मे गणकः पातु शिरसि च निरंतरम् ॥ त्राहि मां देवि गायत्रीछन्द ऋषिः सदामुखे ॥१४॥ हृदये पातु मां नित्यमुच्छिष्टगणदेवता ॥ गुह्ये रक्षतु तद्बीजं स्वाहा शक्तिश्च पादयोः ॥१५॥ कामकीलकं सर्वांगे विनियोगश्च सर्वदा ॥ पार्श्वद्वये सदा पातु स्वशक्तिं गणनायकः ॥१६॥शिखायां पातु तद्बीजं भ्रूमध्ये तारबीजकम् ॥हस्तिवक्त्रश्च शिरसि लम्बोदरो ललाटके ॥१७॥ उच्छिष्टो नेत्रयोः पातु

कर्णौ पातु महात्मने ॥ पाशांकुशमहाबीजं नासिकायां च रक्षतु ॥१८॥ भृतीश्वरःपरः पातु आस्यं जिह्वां स्वयंवपुः ॥ तद्बीजं पातु मां नित्यं ग्रीवायां कंठदर्शके ॥१९॥ गं बीजं च तथा रक्षेत्तथा त्वग्रे च पृष्ठके ॥ सर्वकामश्च हृत्पातु पातु मां च करद्वये ॥२०॥ उच्छिष्टाय च हृदये वह्निबीजं तथोदरे ॥ मायाबीजं तथा कट्यां द्वावूरू सिद्धिदायकः ॥२१॥ जंघायां गणनाथश्च पादौ पातु विनायकः ॥ शिरसः पादपर्यंतमुच्छि-

ष्टगणनायकः ॥२२॥ आपादमस्तकांतं च उमा-
पुत्रश्च पातुमाम् ॥ दिशोऽष्टौ च तथाकाशे
पाताले विदिशाष्टके ॥२३॥ अहर्निशं च मां पातु
मदचंचल लोचनः ॥ जलेऽनले च संग्रामे दुष्टका-
रागृहे वने ॥२४॥ राजद्वारे घोरपथे मातु मां
गणनायकः इदं तु कवचं गुह्यं मम वक्त्राद्विनिर्ग-
तम् ॥२५॥ त्रैलोक्ये सततं पातु द्विभुजश्च चतु-
र्भुजः ॥ बाह्यमभ्यंतरं पातु सिद्धिबुद्धिविनायकः
॥२६॥ सर्वसिद्धिप्रदं देवि कवचमद्भिसिद्धिदम्॥

एकांते प्रजपेन्मंत्रं कवचं युक्तिसंयुतम् ॥२७॥ इदं रहस्यं कवचमुच्छिष्टगणनायकम् ॥ सर्ववर्मसु देवेशि इदं कवचनायकम्॥२८॥ एतत्कवचमाहात्म्यं वर्णितुं नैव शक्यते ॥ धर्मार्थकाममोक्षादिनानाफलप्रदं नृणाम् ॥२९॥ शिवपुत्रः सदापातु मातु मां सुरार्चितः ॥ गजाननः सदा पातु गणराजश्च पातु माम् ॥३०॥ सदा शक्तिरतः पातु पातु मां कामविह्वलः ॥ सर्वाभरणभूषाढ्यः पातु मां सिंदुरार्चितः ॥३१॥ पंचमोदकरः पातु पातु

मां पार्वतीसुतः ।। पाशांकुशधरः पातु पातु मां च धनेश्वरः ।।३२।। गदाधरः सदा पातु पातु मां कामसोहितः ।। नग्ननारीरतः पातु पातु मां च गणेश्वरः ।।३३।। अक्षय्यवरदः पातु शक्तियुक्तः सदावतु ।। भालचंद्रः सदापातु नानारत्नविभूषितः ।।३४।। उच्छिष्टगणनाथश्चमदाघूर्णितलोचनः ।। नारीयोनिरसास्वादः पातु मां गजकर्णकः ।।३५।। प्रसन्नवदनः पातु पातु मां भगवल्लभः ।। जटाधरः सदा पातु पातु मां च किरीट-

धृक् ॥३६॥पद्मासनस्थितःपातु रक्तवर्णश्चपातु
माम् ॥ नग्नसामपदोन्मत्तः पातु मां गणदैवतः
॥३७॥ वामांगे सुंदरीयुक्तः पातु मां मन्मथ-
प्रभुः॥ क्षेत्रप्रवसितः पातु मां श्रुतिपाठकः॥३८॥
भूषणाढ्यस्तु मां पातु नानाभोगसमन्वितः ॥
स्मिताननः सदा पातु श्रीगणेशकुलान्वितः॥३९॥
श्री रक्तचंदनमयः सुलक्षणगणेश्वरः ॥ श्वेतार्कगण-
नाथश्च हरिद्रागणनायकः॥४०॥परिभद्रगणेशश्च
पातु सप्तगणेश्वरः ॥ प्रवालकगणाध्यक्षो गजदंतो

गणेश्वरः ॥४१॥ हरबीजगणेशश्च भद्राक्षगणना-
यकः ॥ दिव्यौषधिसमुद्भूतो गणेशश्चिंतितप्रदः
॥४२॥लवणस्य गणाध्यक्षो मृत्तिकागणनायकः॥
तंडुलाक्षगणाध्यक्षो गोमयस्य गणेश्वरः ॥४३॥
स्फटिकाक्षगणाध्यक्षो रुद्राक्षगणदैवतः ॥नवरत्न
गणेशश्च आदिदेवो गणेश्वरः ॥४४॥ पंचाननश्चतु-
र्वक्त्रः षडाननगणेश्वरः ॥ मयूरवाहनः पातु पातु
मां मूषकासनः ॥४५॥ पातु मां देवदेवेशः पातु
मामृषिपूजितः ॥ पातु मां सर्वदा देवो देवदानवपु-

जितः ॥४६॥ त्रैलोक्यपूजितो देवःपातु मां च विभुः प्रभुः ॥ रंगस्थं च सदा पातु सागरस्थं सदाऽवतु ॥४७॥ भूमिस्थं च सदा पातु पाता-लस्थं च पातु माम् ॥ अन्तरिक्षे सदा पातु आका-शस्थं सदावतु॥४८॥चतुष्पथे सदापातु त्रिपथस्थं च पातु माम् ॥ बिल्वस्थं च वनस्थं च पातु मां सर्वतः स्थितम् ॥४९॥ राजद्वारस्थितं पातु पातु मां शीघ्रसिद्धिदः ॥ भवानी पूजितः पातु ब्रह्म-विष्णुशिवार्चितः ॥५०॥ इदं तु कवचं देवि पठना-

त्सर्वसिद्धिदम् ।।उच्छिष्टगणनाथस्य समंत्रं कवचं परम् ।।५१।। स्मरणाद्भूपतित्वं च लभते सांगतां ध्रुवम् ।। वाचः सिद्धिकरं शीघ्रं परसैन्यविदारणम् ।।५२।। प्रातमध्याह्नसायाह्ने दिवा रात्रौ पठेन्नरः ।। चतुर्थ्यां दिवसे रात्रौ पूजने मानदायकम् ।।५३।। सर्वसौभाग्यदं शीघ्रं दारिद्र्यार्णवघातकम् ।। सुदारसुप्रजासौख्यं सर्वसिद्धिकरं नृणाम् ।।५४।। जलेऽनलेऽनिलेऽरण्ये सिंधुतीरे सरित्तटे ।। श्मशाने दूरदेशे च रणे पर्वतगह्वरे ।।५५।।

राजद्वारे भये घोरे निर्भयो जायते ध्रुवम् सागरे च महाशीते दुर्भिक्षे दुष्टसंकटे ॥५६॥ भूतप्रेतपिशादियक्षराक्षसजे भये ॥ राक्षसीयक्षिणीक्रूरशाकिनीडाकिनीभये॥५७॥राजमृत्युहरं देवि कवचं कामधेनुवत् ॥ अनंतफलदं देवि तथाऽमोघं च पार्वति ॥५८॥ कवचेन विना मंत्रं यो जपेद्गणनायकम् ॥ इह जन्मनि पापिष्ठो जन्मांते मूषको भवेत् ॥५९॥ इति परमरहस्यं देवदैवार्चितस्यकवचमुदितमेतत्पार्वतीशेन देव्यै। पठति स लभते

वैभक्तितो भक्तवर्यः प्रचुरसकलसौख्यं शक्तिपुत्र-
प्रसादात् ॥६०॥ इति श्री[1]रुद्रयामलतंत्रे उमाम-
हेश्वरसंवाद श्रीमदुच्छिष्टगणपतिकवचनिरूपणं
नाम तृतीय रत्नं समाप्तम् ॥३॥ अथ श्रीमदुच्छि-
ष्टगणपतिसहस्रनामस्तोत्रम् ॥ उक्तं च रुद्रयामल-
तंत्रे ॥ श्रीभैरव उवाच ॥शृणु देवि रहस्यं मे य-
त्पुरा सूचितं मया ॥ तव भक्त्या गणेशस्य वक्ष्ये
नामसहस्रकम् ॥१॥ श्रीदेव्युवाच ॥ ॐ भगवन्ना-

१ विश्वसारतन्त्रे इति पुस्तकान्तरे पा. ।

णनाथस्य उच्छिष्टस्य महात्मनः ।। श्रोतुं नाम स-
हस्रं मे हृदय प्रोत्सुकायते ।।२।।श्री भैरव उवाच ।।
प्राङ्मुखे त्रिपुरानाथे जाता विघ्नकुलाः शिवे ।।
मोहने मुच्यते चेतस्तैः सर्वैर्बलदर्पितैः ।।३।। तदा
प्रभुं गणाध्यक्षं स्तुत्वा नामसहस्रकैः ।। विघ्ना दरा-
त्पलायंते कालरुद्रादिव प्रजाः ।।४।।तस्यानुग्रहतो
देवि जातोऽहं त्रिपुरांतकः ।। तमद्यापि गणेशानं
स्तौमि नामसहस्रकैः ।। ५।। तदद्य तव भक्त्याहं
साधकानां हिताय च ।। महागणपतेर्वक्ष्ये दिव्यं

नामसहस्रकम् ॥६॥ॐ अस्य श्रीमदुच्छिष्ट गणेश-
सहस्रनामस्तोत्रमंत्रस्य श्रीभैरवऋषिः गायत्री
छंदः । श्रीमहागणपतिर्देवता । गँ बीजम् । ह्रीं
शक्तिः । कुरु कुरु कीलकम् । मम धर्मार्थकाममो-
क्षार्थे जपे विनियोगः ॥ "ॐ ह्रीं श्रीं क्लीं गणा-
ध्यक्षो ग्लौं गँ गणपतिर्गुणी ॥ [1]गुणाढ्यो निर्गुणो
गोप्ता गजवक्त्रो विभावसुः ॥७॥ विश्वेश्वरो
विभादीप्तो दीपनो धीवरो धनी ॥ सदा शांतो

१ गणाद्यः—इ. पा. ।

जगत्त्राता [1]विश्वावर्तो विभाकरः ॥८॥ [2]विश्रंभी विजयो वैद्यो वा रांनिधिरनुत्तमः ॥ अणिमा[3] विभवः श्रेष्ठो ज्येष्ठो गाथाप्रियो गुरुः ॥९॥ सृष्टिकर्ता जगद्धर्ता विश्वभर्ता जगन्निधिः ॥ पतिः पीतविभूषांको [4]रक्ताक्षो लोहितांबरः ॥१०॥ विरूपाक्षो विमानस्थो विनयः [5]सदस्यः सुखी ॥ सुरूपः सात्त्विकः सत्यः शुद्धः शंकरनंदनः

१ विध्वक्सेनः—इ. पा. २ विस्तम्भी—इ. पा.
३ अणीयान्—इ. पा. । ४ रक्तास्यः—इ. पा. । ५ सात्वतः—इ. पा. ।

॥११॥ नंदीश्वरो जयानन्दी वंद्यः स्तुत्यो विचक्षणः ॥ दैत्यमर्द्दी सदाक्षीबो मदिरारुणलोचनः ॥१२॥ सारात्मा [1]विश्वसारश्च [2]विश्वसारो विलेपनः ॥ परं ब्रह्म परं ज्योतिः साक्षीत्र्यक्षो विकत्थनः ॥१३॥ [3]विश्वेश्वरो वीरहर्ता सौभाग्यो

१ विश्वस्मिन्सर्वस्मिन्सारः श्रेष्ठः स्थिरांश इत्यर्थः ।

२ विश्वं सर्वं सारः अंशो यस्य सः—यदंशभूतं सर्वं जगदित्यर्थः । सर्वं—जगदिदं त्वत्तोजायते' इति श्रुतेः । इति विग्रहभेदात्—द्वयोरेकरूपयोनाम्नोरर्थो विज्ञेयः । ३ वीरेश्वरः—इ. पा. ।

भाग्यवर्द्धनः ।। भृंगिरीटी भृंगमाली भृंगकूजितना-
दितः ।।१४।। [1]विनर्तको विनीतोऽपि विनतान-
न्दनार्चितः ।। वैनतेयो विनम्रांगो विश्वनायकना-
यकः।।१५।।विराटको विराटश्च विदग्धौ विधुरा-
त्मभूः ।। पुष्पदंतः पुष्पहारी पुष्पालाविभूषणः
।।१६।। पुष्पेषुमथनः पुष्टो विवर्तः कर्तरीकरः ।।
अन्त्योऽन्तकश्चित्तगणश्चित्तचिन्तापहारकः १७।।
अचिन्त्योऽचिन्त्यरूपपश्च चन्दनाकुलमुण्डकः ।।

१ विवर्तकः—इ.पा. ।

लोहितो लिपितो लुप्तो लोहिताक्षो विलो-
भकः ॥१८॥ लब्धाशयो लोभरतो लोभदोऽलं
घ्यगर्धकः॥सुन्दरः सुन्दरीपुत्रः समस्तासुरघातनः
॥१९॥ नूपुराढ्योविभवेन्द्रो नरनारायणोरविः॥
विचारो वान्तदो वाग्मी वितर्की विजयीश्वरः
॥२०॥ सुप्तो बुद्धः सदारूपः सुखदः सुखसेवितः॥
विकर्तनो वियच्चारी विनटो नटनर्तकः ॥२१॥
नटो नाट्यप्रियो नादौऽनन्तोऽनन्तगुणात्मकः॥
गंगाजलपानप्रियो गंगातीरविहारकृत ॥२२॥

गंगाप्रियो गंगजश्च वाहनादिपुरः सरः ॥ गंधमा-
दन संवासो गंधमादनकेलिकृत् ॥२३॥ गन्धानु-
लिप्तपूर्वांगः सर्वदेवस्मरः सदा ॥ गणगन्धर्वरा-
जेशो गणगन्धर्वसेवितः ॥२४॥ गन्धर्वपूजितो
नित्यं सर्वरोगविनाशकः ॥ गन्धर्वगणसंसेव्यो
गन्धर्ववरदायकः ॥२५॥ गन्धर्वो गन्धमातंगो
गन्धर्वकुलदैवत॥गंधर्वगर्वसंवेगो गंधर्ववरदायकः
॥२६॥ गन्धर्वप्रबलार्तिघ्नो गंन्धर्वगणसंयुतः ॥
गंधर्वादिगुणानंदो नंदोनंतगुणात्मकः ॥२७॥

[1]विश्वमूर्ति र्विश्वधाता विनतास्यो विनर्तकः ॥ कराल: कामदः कांतः कमनीयः कलानिधिः ॥२८॥कारुण्यरूपः कुटिलः कुलाचारी कुलेश्वरः॥ विकरालो रणश्रेष्ठः संहारो हारभूषणः ॥२९॥ उरुरम्यमुखो रक्तो देवतादयितौरसः॥महाकालो महादंष्ट्रो महोरगभयानकः ॥३०॥ उन्मत्तरूपः कालाग्निरग्निसूर्येन्दुलोचनः ॥ सितास्यः सितमाल्यश्च सितदन्तः सितांशुमान् ॥३१॥ असितात्मा

१ विश्वसूर्विश्वधाती च—इ. पा. ।

भैरवेशो भाग्यवान्भगवान्भवः[1] ॥ गर्भात्मजो भगावासो भगदो भगवर्द्धनः ॥३२॥ शुभंकरः शुचिः शांतः श्रेष्ठः श्रव्यः शचीपतिः ॥ वेदाद्यो वेदकर्ता च वेदवेद्यः सनातनः ॥३३॥ विद्याप्रदो वेदरसो वैदिको वेदपारगः ॥ वेदध्वनिरतो वीरो वेदविद्यागमोर्थवित् ॥३४॥ तत्त्वज्ञः सर्वगःसाधुः सदयः सदसन्मयः ॥ शिवंकरः शिवसुतः शिवानंद-विवर्द्धनः ॥३५॥ [2]शैत्यः श्वेतः शतमुखो मुग्धो

१ भगः—इ. पा.। २ सैन्यः—इ. पा.।

[1]मोदकभूषणः ।। देवो दिनकरो धीरो धृतिमान्द्यु-
तिमान्धवः ।।३६।। शुद्धात्मा शुद्धमतिमाञ्छुद्धदी-
प्तिः शुचिव्रतः ।। शरण्यः शौनकःशूरः [2]शरदम्भो-
जधारकः ।।३७।। दारकः शिखिवाहेष्टः [3]सितः
शंकरवल्लभ ।। शंकरो निर्भयो नित्यो लयकृल्ला-
स्यतत्परः।।३८।।लूतो लीलारसोल्लासीविलासी
विभ्रमो भ्रमः ।। भ्रमणः शशिभृत्सूर्यः शनिर्धरणि-
नंदनः ।।३९।। बुधो विबुधसेव्यश्च बुधराजो बलं

१ मोदकभजनः—इ. पा. । २ शब्दंभी जटोरुकः—इ. पा. । ३ शीतः—इ. पा.

धरः ।। जीवो जीवप्रदो जेता स्तुत्यो नित्यो रति-
प्रियः।।४०।।जनको जनमार्गज्ञो जनरक्षणतत्परः।।
जनानंप्रदाता च जनकाह्लादकारकः ।।४१।।
विबुधो बुधमान्यश्च जैनमार्गनिवर्तकः ।। गच्छो
गणपतिर्गच्छनायको गच्छगर्वहा ।।४२।। गच्छरा-
जोथ गच्छेशो गच्छराजनमस्कृतः ।। गच्छप्रियो
गच्छगुरुर्गच्छत्राकृद्यमातुरः ।।४३।। गच्छप्रभुर्ग-
च्छचरो गच्छप्रियकृताद्यमः ।। गच्छगीतगुणो-
गर्तो मर्यादाप्रतिपालकः ।।४४।। गीर्वाणागमसार-

स्यगर्भोगीर्वाणदेवता ॥ गौरीसुतो गुरुवरो गौ-
रांगो गणपूजितः ॥४५॥ परंपदं परंधाम पर-
मात्मा कविः [1]कुजः ॥ राहुर्दैत्यशिरश्छेदी केतुः
कनककुण्डलः ॥४६॥ ग्रहेन्द्रो ग्राहितो ग्राह्योऽग्र
णीर्घुर्घुरनादितः ॥ पर्जन्यः पीवरः पत्री पीन-
वक्षाः पराक्रमी ॥४७॥वनेचरो वनपतिर्वनवासी
स्मरोपमः ॥ पुण्यः पूतः पवित्रश्च परात्मा पूर्णावि-

१ कुः भूमिः– भूच्छायाशब्देन बोध्या तस्यां जातः—छायापुत्रः शनिरित्यर्थः एवं चात्र कुजशब्देन छायापुत्रः शनिर्बोध्यः ।

ग्रहः॥४८॥ पूर्णेन्दुसुकलाकारो मंत्रपूर्णमनोरथः॥
युगात्मा युगकृद्यज्वा याज्ञिको यज्ञवत्सलः॥४९॥
यशस्वी यजमानेष्टो वज्रभृद्वज्रपञ्जरः॥ म-
णिभद्रो मणिमयो मान्यो मीनध्वजाश्रितः॥५०॥
मीनध्वजो मनोहारी योगिनां योगवर्धनः॥
द्रष्टा स्रष्टातपस्वीचविग्रही तापसप्रियः॥५१॥
तपोमयस्तपोमूर्तिस्तपनश्च तपोधनः॥ संपत्तिसद-
नाकारः संपत्तिसुखदायकः॥५२॥ संपत्तिसुख-
कर्ता च संपत्तिसुभगाननः॥ संपत्तिशुभदो नित्यसं-

पत्तिश्च यशोधनः ॥५३॥ [1]रुचको मेचकस्तुष्टः प्रभुस्तोमरघातकः ॥ दंडीचंडांशुरव्यक्तः कमंडलुधरोऽनघः ॥५४॥ कामी कर्मरतःकालः कोलः क्रंदितदिक्तटः ॥ भ्रामको जातिपूज्यश्च जाड्यहा जडसूदनः ॥५५॥ जालंधरो [2]जगद्वासी हास्यकृद्गहनो गुहः ॥ हविष्मान्हव्यवाहाक्षो हाटको हाटकांगदः ॥५६॥ सुमेरुर्हिमवान्होताहरपुत्रो [3]हलंकषः ॥ हालाप्रियोहृदा शांतः कांताहृदयपो-

१ रोचकोहृष्टः—इ. पा. । २ जगद्वासी—इ. पा. । ३ हलांकपः—इ. पा. ।

षणः ॥५७॥शोषणः क्लेशहा क्रूरः कठोरः कठिना-
कृतिः ॥ कुबेरोधीमयो ध्याता ध्येयो धीमान्दया-
निधिः ॥५८॥ दविष्ठो दमनो हृष्टो दाता त्राता
पिता समः॥निर्गतो नैगमोगम्यो निर्जयोजटिलो-
ऽजरः ॥५९॥ जनजीवोजितारातिर्जगद्व्यापी
जगन्मयः ॥ चामीकरनिभोनाभ्यो नलिनायत-
लोचनः ॥६०॥ रोचनो मोचको मंत्री मंत्रकोटि-
समाश्रितः ॥पंचभूतात्मकः पंचसायकः पंचवक्त्रकः
॥६१॥ पंचमः पश्चिमः पूर्वः पूर्णः कीर्णालकः

कुणिः ।। कठोरहृदयो ग्रीवालंकृतो ललिताशयः
।।६२।।लोलचित्तो बृहन्नासो मासपक्षर्तु रूपवान्।।
ध्रुवो द्रुतगतिर्बंधो धर्मी नाकिप्रियोऽनलः
।।६३।। [1]अंगुल्यग्रस्थभुवनो भुवनैकमलापहः ।।
सागरः स्वर्गतिः स्वक्षः सानंदः साधु पूजितः
।।६४।। सतीपतिः समरसः सनकः सरलः सरः ।।
सुरप्रियो वसुमतिर्वासवो वसुपूजितः ।।६५।।
वित्तदो वित्तनाथश्च धनिनां धनदायकः ।। राजीव-

१ अगस्त्यग्रस्तभुवनः—इ. पा. ।

नयनः स्मार्तः [1]स्मृतिदः कृत्तिकांबरः ॥६६॥
आश्विनोऽश्वमुखः शुभ्रो भरणो भरणीप्रियः ॥
कृत्तिकासनकः कोलो [2]रोहिणीरमणोपमः॥६७॥
रौहिणेयप्रेमकारी रोहिणीमोहनो मृगः ॥ मृगरा-
जो मृगशिरा माधवो मधुरध्वनिः ॥६८॥आर्द्रा-
ननो महाबुद्धिर्महोरगविभूषणः ॥ भ्रूक्षेपदत्तवि-
भवो भ्रूकरालः पुनर्मयः ॥६९॥ पुनर्देवः पुनर्जेता
पुनर्जीवः पुनर्वसुः ॥ [3]तिमिरास्तिमिकेतुश्च

१ स्मृतिहा–इ. पा. । २ रोहिणी रोहिणो यम –इ. पा.।३ तित्तिरः–इ. पा.

तितिषासुरघातनः ॥७०॥ तिष्यस्तुलाधरो [1]जृंभो [2]विश्लेषाश्लेषदानराट् ॥ मानदो माधवो माधो वाचालो मघवोपमः ॥७१॥ मध्यो मघाप्रियो मेघो महाशुंडो महाभुजः ॥ पूर्वाफाल्गुनिकःस्फीत [3] फल्गुरुत्तरफाल्गुनः ॥७२॥ फेनिलो ब्रह्मदो ब्रह्मा सप्ततंतुसमाश्रयः॥घोणा हस्तश्चतुर्हस्तो हस्तिवक्त्रोहलायुधः॥७३॥ चित्रांबरोऽर्चितपदः स्वस्तिदः स्वस्तिविग्रहः ॥ विशाखः शिखिसेव्यश्च

१ जम्भः—इ.पा.। २ विश्लेषण एणराट्—इ.पा.। ३ प्रीतः—इ.पा.।

शिखिध्वजसहोदरः ॥७४॥ अणुरेणूत्करः स्फारो रूरुरेणुसुतो नरः ॥ अनुराधाप्रियो राधः श्रीमाञ्छुक्लः शुचिस्मितः ॥७५॥ ज्येष्ठः श्रेष्ठार्चितपदो मूलं च त्रिजगद्गुरुः ॥ शुचिश्चैव पूर्वाषाढश्चोत्तराषाढ ईश्वरः ॥७६॥ श्रव्योभिजिदनंतात्मा श्रवो वेपितदानवः ॥ श्रावणः श्रवणः श्रोता धनी धन्यो धनिष्ठकः ॥७७॥ [1]शातातपः शातकुंभः शरज्ज्योतिः शताभिषक् ॥ पूर्वाभाद्रपदो

१ धनेप्सुकः सदातीव्रः शीतकुभः शरद्द्युतिः—इ. पा. ।

भद्रश्चोत्तराभाद्रपादितः ॥७८॥ रेणुक्वातनयो रामो रेवतीरमणो रमी ॥ आश्वयुक्कार्तिकेयेष्टो मार्गशीर्षो मृगोत्तमः ॥७९॥ पोषेश्वरः फाल्गुनात्मा वसंतश्चैत्रको मधुः ॥ राज्यदोभिजिदात्मीयस्तारेशस्तारकद्युतिः ॥८०॥ प्रतीतः प्रोर्जितः प्रीतः परमः परमो हितः ॥ परहा पंचभूः पंचवायुपूज्यः [1]परिग्रहः ॥८१॥ पुराणागमविद्योगी महिषो रासभोऽग्रजः ॥ ग्रहो मेषो वृषो मन्दो

[1] परोग्रहः—ह परीग्रहः

१ परीमहः—इ. परीसहः— इ. च पा. ।

मन्मथो [1]मिथुना कृतिः ॥८२॥[2] कल्पभृत्कट्को दीपो मर्कटः कर्कटोघृणिः । कुक्कुटोवनजोहंसः परमहंसः सृगालकः ॥८३॥ सिंहः सिंहासना भूष्यो मद्गुर्मूषकवाहनः ॥[3] पुत्रदो नरकत्राता कन्याप्रीतः कुलोद्वहः ॥८४॥ अतुल्यरूपो बलदस्तुल्यभृत्तुल्यसाक्षिकः ॥ अलिश्चापधरो धन्वी कच्छपो मकरो मणिः॥८५॥कुंभभृत्कलशः

१ मिथुनाचितः—इ. पा.। २ कल्पभृत्क टकटकोदीपो मर्कटसत्प्रभुः। कर्कटो घुणिक्कूटो वनजो हसगो हसः— इ. पा.। ३ कन्याकलावतीपुत्रः—इ. पा. ।

कुब्जो मीनमांससुतर्पितः ॥ राशितारागृहमय-
स्तिथिरूपो जगद्विभुः ॥ ८६ ॥ प्रतापी प्रतिपत्प्रे-
योऽद्वितीयोऽद्वैतनिश्चितः। त्रिरूपश्च तृतीयाग्नि-
स्त्रयीरूपस्त्रयीतनुः ॥८७॥ चतुर्थीवल्लभो देवो
परागः पंचमीश्वरः ॥ षड्रसास्वादविज्ञानः षष्ठी-
षष्ठिकवत्सलः ॥८८॥ सप्तार्णवगतिः सारः
सप्तमीश्वर रोहितः ॥ अष्टमीनंदनोत्तंसो नवमी-
भक्तिभावितः ॥८९॥ दशदिक्पतिपूज्यश्च दशमी-
द्रुहिणो द्रुतः ॥ एकादशात्मगणपो द्वादशीयुगच-

र्चितः ॥९०॥ त्रयोदशमणिस्तुत्यश्चतुर्दशस्वर-
प्रियः ॥ चतुर्दशेंद्रसंस्तुत्यः पूर्णिमानंदविग्रहः
॥९१॥ दर्शादर्शो[1] दर्शनश्च वानप्रस्थो महेश्वरः ॥
मौर्वी मधुरवाङ्मूलमूर्तिमान्मेघवाहनः ॥९२॥
महागजो जितक्रोधो जितशत्रुर्जयाश्रयः ॥ रौद्रो
रुद्रप्रियो रुद्रो रुद्रपुत्रोघनाशनः ॥९३॥ भवप्रियो
भवानीष्टो भारभृद्भूतभावनः गांधर्वकुशलोऽ
कुंठो वैकुंठो विष्टरश्रवाः ॥९४॥ [2]वृत्रहा विघ्नहा

१ दर्शगश्च —इ. पा. । २ वृहत्कायो विघ्नहर.—इ. पा. ।

सीरः समस्तदुःखतापहा ॥ मंजुरो मार्जरो मत्तो दुर्गापुत्रो दुरालसः ॥९५॥ अनंतचित्सुधाधोरो वीरो वीर्यैकसाधकः ॥ भास्वन्मुकुटमाणिक्यः कूजत्किंकिणिजालकः ॥९६॥ शुंडाधारी तुंडचलः कुण्डली मुंडमालकः पद्माक्षः पद्महस्तश्च पद्मानाभसमर्चितः ॥९७॥ उद्धृताधरदंताढ्यो मालाभूषणभूषितः ॥ [1]मारदोवारणो लोलश्रवणः शूर्पकर्णकः ॥९८॥ बृहदुल्लासनासाढ्यो [2]व्याप्त-

१ नारदः— इ. पा. । २ व्यासमण्डलमण्डितः—इ. पा. ।

१ भारद.— इ. पा. । २ व्योममण्डलमण्डित.— इ. पा. ।

त्रैलोक्यमंडलः ॥ [1]रत्नमंडलमध्यः कृशानुरूपशी-
लकः ॥९९॥ बृहत्कर्णाञ्चलोद्भूतवायुवीजितदि-
[2]क्तटः ॥ बृहदास्यरवाक्रांतभीतब्रह्मांडभांडकः
॥१००॥ बृहत्पादसमाक्रांतसप्तपातालदीपितः ॥
बृहद्दंतकृतात्युग्ररणानंदरसालसः ॥१०१॥
बृहद्धस्तधृताशेषायुधनिर्जितदानवः ॥ स्फुरत्सिंदू-
रवदनः स्फुरत्तेजोग्निलोचनः ॥१०२॥ उद्दीपित-

१ इडामंडलसंभ्रांतः कृतानुग्रहजीवकः—इ., रत्नमण्डलआसीनः—इ. च पा. ।

२ दिक्पटः—इ. पा. ।

मणिस्फूर्जन्नूपुरध्वनिनादितः ॥ चलत्तोयप्रवाहा-
ढ्यो नदीजलकणाकरः ॥१०३॥ भ्रमत्कुंजरसंघा-
तवंदितांघ्रिसरोरुहः ॥ ब्रह्माच्युतमहारुद्रपुरः
सरसुरार्चितः ॥१०४॥ अशेषशेषप्रभृतिव्या
लजालोपसेवितः ॥ गर्जत्पंचाननारावव्याप्ता-[1]
काशधरातलः ॥१०५॥ हाहाहूहूगतात्युग्रस्वर-
विभ्रांतमानसः ॥ पंचाशद्वर्णबीजाख्यमंत्रमंत्रित
विग्रहः ॥१०६॥ वेदांतशास्त्रपीयूषधाराप्लावि-

[1] प्रसादितधरातलः—इ. पा.।

१ प्रसादितवरातलः—इ. पा. ।

तभूतलः ।।शंखध्वनिसमाक्रांतपातालादिनभतलः ।।१०७।। चिंतामणिर्महामल्लो बल्लहस्तो बलिः कविः ।। कृतत्रेतायुगोल्लासभासमानजगत्त्रयः ।।१०८।। द्वापरः परलोकैकः कर्मध्वांतसुधाकरः ।। सुधासिक्तवपुर्व्यासो ब्रह्मांडादिकबाहुकः ।।१०९।। अकारादिक्षकारांतवर्णपंक्तिसमुज्ज्वलः।। अकाराकारप्रोद्गीतताननादनिनादितः ।।११०।।इकारेकारमंत्राढ्यमालाभ्रमणलालसः।। उकारोकारप्रोद्गारिघोरना गोपवीतकः।।१११।।

ऋवर्णांकितऋकारिपद्मद्वयसमुज्ज्वलः ।। लृकार युतलृकारशंख पूर्णदिगंतरः ।।११२।। एकारैककारगिरिजास्तनपानविचक्षणः ।। ओकारौकांरविश्वादिकृतसृष्टिक्रमालसः ।।११३।। अंअःवर्णावलीव्याप्त पादादिशीर्षमंडलः ।। कर्णतालकृतात्युच्चैर्वायुवीजितनिर्जरः ।।११४।। खगेशध्वजरत्नांककिरीटारुणपादकः ।। गर्विताशेषगंधर्वगीततत्परश्रोत्रकः ।।११५।। घनवाहनवागीशपुरः सरसरार्चितः ।। ङवर्णामृतधाराढ्यशोभमानैकदंतकः

॥११६॥ चंद्रकुंकुमजंबाललिप्तसिंदूरविग्रहः ॥ छत्रचामररत्नाढ्यमुकुटालंकृताननः ॥ ११७॥ जटाबद्धमहानर्घमणिपंक्तिबिराजितः ॥ झंकारिमधुपव्रातगाननादविनादितः ॥११८॥ ञवर्णकृतसंहारदैत्यासृक्पर्णमुद्गरः ॥ टकाराख्यफलास्वादवेपिताशेषमूर्धजः ॥११९॥ ठकाराद्यडकारांकढकारानन्दतोषितः ॥ णवर्णामृतपीयूषधाराधारसुधाकरः ॥१२०॥ ताम्रसिन्दूरपूजाढ्यललाटफलकच्छविः ॥ थकारधनपंक्त्यातिसंतोषितद्विज-

व्रजः ॥१२१॥दयामृतहृदंभोजधृतत्रैलोक्यमंड-
लः॥ धनदादिमहायक्षसंसेवित पदांबुजः॥१२२॥
नमिताशेषदेवौघकिरीटमणिरंजितः ॥ परवर्गापि
वर्गादिभोगच्छेदनदक्षकः ॥१२३॥फणिचक्रसमा-
[1]क्रांतगल मंडलमंडितः ॥ बद्धभ्रूयुगभीमोग्रसंत-
र्जितसुरासुरः ॥१२४॥ भवानीहृदयानंदवर्द्धनैक
निशाकरः ॥ मदिराकलशस्फीतकरालैककरां-
बुजः ॥१२५॥ यज्ञांतरायसंघातसज्जीकृतवरा-

१ मल्लमण्डलमंडितः—इ. पा. ।

युधः ॥ रत्नाकर सुताकांतिक्रांति कीर्तिविव-
र्धनः ॥१२६॥ लंबोदरमहाभीमवपुर्दीप्तकृता-
सुरः ॥ वरुणादिदिगीशानस्वर्चितार्चनचर्चितः
॥१२७॥ शंकरैकप्रियप्रेमनयनानंदवर्द्धनः ॥
षोडशस्वरितालापगीत गानविचक्षणः ॥१२८॥
समस्तदुर्गतिसरिन्नाथोत्तारणकोडुपः ॥ हरादिब्र-
ह्मवैकुंठब्रह्मगीतादिपाठकः ॥१२९॥ क्षमापूरित-
हृत्पद्मसंरक्षितचराचरः ॥ तारांकमंत्रवर्णैकविग्र-
होज्ज्वलविग्रहः ॥१३०॥ अकारादिक्षकारांतवि-

द्याभूषितविग्रहः ।।ॐ श्रीविनायको ॐ ह्रीं विघ्ना-
ध्यक्षो गणाधिपः ।।१३१।। हेरंबो मोदकाहारो
वक्रतुंडो विधिः स्मृतः ।। वेदांतगीतो विद्यार्थिसि-
द्धमंत्रः षडक्षरः ।।१३२।। गणेशो वरदो देवो
द्वादशाक्षर मंत्रितः ।। सप्तकोटिमहामंत्रमंत्रिता-
शेषविग्रहः ।।१३३।। गांगेयो गणसेव्यश्च ॐ
श्रीद्वैमातुरः शिवः ।। ॐ ह्रीं श्रीं क्लीं ग्लौं गँ देवो
महागणपतिः प्रभुः ।।१३४।। इदं नामसहस्रं तु
महागणपतेः स्मृतम् ।। गुह्यं गोप्यतमं सिद्धं

सर्वतंत्रेषु गोपितम् ॥१३५॥ सर्वमंत्रमयं दिव्यं [1]सर्वविघ्न विनाशनम् ॥ ग्रहतारामयं राशिवर्ण-पंक्तिसमन्वितम् ॥१३६॥ सर्वविद्यामयं ब्रह्मसा-धनं साधकप्रियम् ॥ गणेशस्य च सर्वस्वं रहस्यं त्रिदिवौकसाम् ॥१३७॥ यथेष्टफलदं लोके मनोरथप्रपूरणम् ॥ अष्टसिद्धिमयं श्रेष्ठं साधका-नां जयप्रदम् ॥१३८॥ विनार्चनं विना होमं विना न्यासं विना जपम् ॥ अणिमाद्यष्टसिद्धीनां साधनं

१ सर्वमंत्रविनायकम् —इ. पा ।

स्मृतिमात्रतः ॥१३९॥ चतुर्थ्यामर्धरात्रे तु पठे-
न्मंत्री चतुष्पथे ॥ लिखेद्भूर्जे महादेवि पुण्यं-
नामसहस्रकम् ॥१४०॥ धारयेत्तं चतुर्दश्यां
मध्याह्ने मूर्ध्नि वा भुजे ॥ योषिद्वामकरे चैव
पुरुषो दक्षिणे भुजे ॥१४१॥ स्तंभयेदपि ब्रह्माणं
मोहयेदपि शंकरम् ॥ वशयेदपि त्रैलोक्यं मारयेद
खिलान्रिपून ॥१४२॥ उच्चाटयेच्चगीर्वाणं शम-
येच्च धनंजयम् ॥ वंध्या पुत्रं लभेच्छीघ्रं निर्धनो
धनमाप्नुयात् ॥१४३॥ त्रिवारं यः पठेद्रात्रौ

गणेशस्य पुरः शिवे ॥ नग्नः शक्तियुतो देवि भुक्त्वा भोगान्यथेप्सितान् ॥१४४॥ प्रत्यक्षवरदं पश्येद्गणेशं साधकोत्तमः ॥ य इदं पठते नाम्ना सहस्रं भक्तिपूर्वकम् ॥१४५॥ तस्य वित्तादिविभवो दारायुः संपदः सदा ॥ रणेराजमये द्यूते पठेन्नामसहस्रकम् ॥१४६॥ सर्वत्र जयमाप्नोति गणेशस्य प्रसादतः ॥१४७॥ इतीदं पुण्यसर्वस्वं मंत्रनामसहस्रकम् ॥ महागणपतेः पुण्यं गोपनीयं स्वयोनिवत् ॥१४८॥ इति श्रीरुद्रयामलतंत्रे

श्रीमदुच्छिष्टगणेशसहस्रनामस्तोत्रनिरूपणंनाम चतुर्थं रत्नम् ॥४॥ श्रीगणेशाय नमः ॥ अथ श्रीमदुच्छिष्टगणेशस्तवराजप्रारम्भः ॥ उक्तं च रुद्रयामले ॥ देव्युवाच ॥ पूजांते ह्यनया स्तुत्या स्तुवीत गणनायकम् ॥ नमामि देवं सकलार्थदं तं सुवर्णवर्णं भुजगोपवीतम् ॥ गजाननं भास्करमेकदंतं लंबोदरं वारिभवासनं च ॥१॥ केयूरिणंहारकिरीटजुष्टं चतुर्भुजं पाशवराभयानि ॥ सृणिंवहन्तं गणपं त्रिनेत्रं सचामरस्त्रीयुगलेन युक्तम्॥२॥

षडक्षरात्मानमनल्पभूषं मुनीश्वरैर्भार्गव पूर्वकैश्च ॥ संसेवितं देवमनाथकल्पं रूपं मनोज्ञं शरणं प्रपद्ये ॥३॥ वेदांतवेद्यं जगतामधीशं देवादिवंद्यं सुकृतैकगम्यम् ॥ स्तंबेरमास्यं नवचन्द्रचूडं विनायकं तं शरणं प्रपद्ये ॥४॥ भवाख्य दावानलदह्यमानं भक्तं स्वकीयं परिषिंचते यः ॥ गंडस्रुतांभोभिरन्यतुल्यं वंदे गणेशं च [1]तमालनीलम् ॥५॥ शिवस्य मौलाववलोक्य चन्द्रं सुशुंडया मुग्धतया

१ तमोरिनेत्रम्—इ. पा. ।

स्वकीयम् ।। भग्नं विषाणं परिभाव्य चित्ते आकृष्ट-
चन्द्रो गणपोऽवतान्नः ।।६।। पितुर्जटाजूटतटे
विलोक्य भागीरथीं तत्र कुतूहलेन ।। विहर्तुकामः
स महीध्रपुत्र्या निवारितः पातु सदा गजास्यः
।।७।। लम्बोदरो देवकुमारसंघैः क्रीडन्कुमारं
जितवान्निजेन् ।। करेण चोत्तोल्य ननर्त रम्यं
दन्तावलास्यो भयतः सपायात् ।।८।। आगत्य
चौच्चैर्हरिनाभिपद्मंददर्श तत्राशु करेण तच्च ।।

उद्धर्त्तुमिच्छन्विधिचाटुवाक्यं[1] श्रुत्वा मुमोचावतु नो गणेशः ॥९॥ निरंतरं संस्कृतदानपट्टेलग्नां तु गुंजद्भ्रमरावलिंवै ॥ तां श्रोत्रतालैरपसारयंतं स्मरेद्गजास्यं निजहृत्सरोजे ॥१०॥ विश्वेशमौलिस्थितजह्नुकन्याजलं गृहीत्वा निजपुष्करेण ॥ हरं सलीलं पितरं स्वकीयं प्रपूजयन्हस्तिमुखः स पायात् ॥११॥ स्तंबेरमास्यं घुसृणांगरागं सिंदूरपूरारुणकांतकुंभम् ॥ [2]कुचन्दनालिप्तकरं गणेशं-

१ विधिवादवाक्यम्—इ. पा. । २ कुचन्दनाश्लिष्टकरम्—इ. पा. ।

ध्यायेत्स्वचित्ते सकलेष्टदं तम् ॥१२॥ सभीष्ममा-
तुर्निजपुष्करेण जलं समादाय कुचौ स्वमातुः ॥
प्रक्षालयामास षडास्यपीतौ स्वार्थं मुदेऽसौ कल-
भाननोऽस्तु ॥१३॥ तं वामनांगं शिशुभावमाप्तं
केनापि सत्कारणतो धरित्र्याम् ॥ वक्तारमाद्यं
निगमादिकानां लोकैक वंद्यं प्रणमामि [1]विघ्नम्
॥१४॥ आलिंगितं चारुरुचा मृगाक्ष्या संभोग-
लोलं मदविह्वलांगम् ॥विघ्नौघविध्वंसनसक्तमेकं

१ विघ्नं—विघ्ननाशकमित्यर्थः ।

नमामि कांतंद्विरदाननं तम् ॥१५॥ हेरंब उद्यद्र-
विकोटिकांतः पञ्चाननेनाप्यवलंबितांसः ॥ मुनी-
न्सुरान्भक्तजनांश्च सर्वान्स पातु रथ्यासु सदा
गजास्यः ॥१६॥ द्वैपायनोक्तं सुविचार्य येन स्वदंत-
कोटया निखिलं लिखित्वा ॥ दत्तं पुराणं सुतमिं
दुमौलेस्तमग्र्यरूपं मनसा स्मरामि ॥१७॥
क्रीडाप्रवृत्ते जलधाविभास्ये वेलाजलेऽथांबुपतिः
प्रभीतः ॥ विचिन्त्य कस्येति सुरास्तदा तं
विश्वेश्वरं वाग्भिरभिष्टुवंति ॥१८॥ वाचां

निमित्तं ह्यनिमित्तमाद्यं पदं त्रिलोक्यां निखिल-
स्तुतीनाम् ।। सर्वैश्च वंद्यो न च तस्य वंद्यः स्थाणोः
परं रूपमसौ स पायात् ।।१९।। इमां स्तुतिं यः
पठतीह भक्त्या समाहितप्रीतिरतीव शुद्धः ।।
संसेव्य ते चेंदिरया नितांतं दारिद्र्यसंघं स विदार-
येन्नः ।।२०।। इति श्रीरुद्रयामलतंत्रे हरगौरीसं-
वादे श्रीमदुच्छिष्टगणेशस्तोत्रनिरूपणं नाम
पंचमं रत्नम् ।।५।। इति श्रीमदुच्छिष्टगणपति-
पञ्चरत्नं संपूर्णम् ।। श्रीगणेशार्पणमस्तु ।। ॐ गं ।।

अथ श्रीबृहज्ज्योतिषार्णवान्तर्गतधर्मस्कन्धान्तः-
पात्युपासनास्तबके श्रीमदुच्छिष्टचाण्डालिन्युपा-
सनाप्रारम्भः ॥ अथोच्छिष्टचांडाली मंत्राः ॥
उक्तं च तंत्रसारे ॥ तदुक्तं फेत्कारिण्याम् ॥ उच्चा-
र्योच्छिष्टशब्दं तु तथा चांडालिनीति च ॥ सुमु-
खीति ततो देवीं कीर्त्तयेत्तदनंतरम् ॥१॥ महापि-
शाचिनीं पश्चाल्लज्जाबीजं ततः परम् ॥ नादबिं-
दुसमायुक्तं ठकारत्रितयं पुनः ॥२॥ सविसर्गं
महादेवि सर्वसिद्धिप्रदायकम् ॥" मंत्रांतरम् ॥

तदुक्तं तंत्रांतरे ॥ "अथोच्छिष्टचांडालिमातंगीप-
दमीरयेत् ॥३॥ ततः सर्ववशं चांते करिहृद्वह्निव-
ल्लभा ॥ एकोनविंशता वर्णैः सर्वा भीष्टकरा
भवेति ॥४॥" मंत्रातरं मंत्रदेवप्रकाशिकायाम् ॥
"वाग्भवं ऐँ माया ह्रीं कामःक्लीं सौः ऐं ज्येष्ठमा-
तंगि नमामि उच्छिष्टचांडालिनि त्रैलोक्यवशं-
करि स्वाहा ॥" इति । इमां विद्यां जपेद्देवि
चापरा हुंसमाश्रिता ॥ इयं विद्या महाविद्या
सर्वपापापहारिणी ॥५॥ स्वर्गदा मोक्षदा

चैव राजसौभाग्यदायिका।।यां यां प्रार्थयते सिद्धिं हठात्तां तामवाप्नुयात् ।।६।। विधानं च प्रवक्ष्यामि शृणु देवि वरानने ।। भोजनानंतरं देवि विनैवाच-मने कृते ।।७।। बलिं दद्यात्प्रथमतो मूलमंत्रेण साधकः ।। ततो मंत्रं जपेद्धचात्वा देवीं तामिष्टसि-द्धये ।।८।।" बलिमप्युच्छिष्टेन ।। तथा च-"न तिथिर्न च नक्षत्रं न चांगन्यासमेव च ।। नारिदो-षो न वा विघ्नं नाशौचं नियमो न च ।।९।। यस्य तिष्ठति मंत्रोऽयं न च विघ्नैः स बाध्यते ।।"

ध्यानं तु—"शवोपरि समासीना रक्तांबर परिच्छदाम् ॥१०॥ रक्तालंकारसंयुक्तां गुंजाहारविभूषिताम् ॥ षोडशाब्दां च युवतीं पीनोन्नतपयोधराम् ॥११॥ कपालकर्त्तिकाहस्तां परज्योतिः स्वरूपिणीम् ॥ वामदक्षिणयोगेन ध्यायेन्मंत्रविदुत्तमः ॥१२॥ स्थंडिले च बलिं दत्त्वा जपेत्तद्गतमानसः ॥ उच्छिष्टेन च कर्त्तव्यो जपः [1]स्यात्सिद्धिमिच्छता ॥१३॥ उच्छिष्टे जपमानस्य जायंते

[1] कर्तव्यः स्यादितिसम्बन्धः ।

१ कर्तव्यः स्यादितसम्बन्धः ।

सर्वसिद्धयः ।। अपरं च प्रवक्ष्यामि शृणु देवि फल-
प्रदम्।।१४।।होमं च तर्पणं चैव सर्वकामार्थसिद्धये।।
स्थंडिले मंडलं कृत्वा चतुरस्रं समंततः ।।१५।।
पूजयेन्मंडले देवि मूल मंत्रेण साधकः ।।" ततोमूल-
मुच्चार्य ॐ मंडलाय नमः इति मन्त्रेण वह्निस्व-
रूपां देवतां ध्यात्वा होमयेत् ।। तथा च "ततो
देवीं समाधाय वह्निरूप व्यवस्थिताम् ।। देवीं
ध्यात्वा ऽऽचरेद्धोमं दधिसिद्धान्नतंदुलैः ।।१६।।
सहस्रमात्रहोमेन राजानं वशमानयेत्।।मार्जारस्य

तु मांसेन देव्या होमं समाचरेत् ॥१७॥स प्राप्नोति परां विद्यां सर्व शास्त्रवशीकृताम् ॥कुर्याच्छागस्य मांसेन होमं मधुसमन्वितम् ॥१८॥ सहस्रैकविधानेन भवंति कुलसिद्धयः ॥ विद्याकामश्चरेद्धोमं शर्करायुतपायसैः ॥१९॥ तस्य वै देविसिद्ध्यन्ति सद्यो विद्याश्चतुर्दश ॥ बिल्वपत्रैस्त्रिमध्वक्तैर्मासमेकं [1]समाहितः ॥२०॥ वंध्यापि लभते पुत्रं चिरंजीविनमुत्तमम् ॥ कर्कन्धूकुसुमं हुत्वा छागर-

[1] होमं चरेदिति शेषः ।

१ होम चरादीत शेषः ।

क्तसमन्वितम् ॥२१॥ दुर्भगाया हठाद्देवि सौभाग्यं शुभदायकम् ॥ रजस्वलाया वस्त्रेण मधुना पायसेन च ॥२२॥ होमं कृत्वा महादेवि त्रैलोक्यं वशमानयेत् ॥ इत्येषा कथिता देवि सर्वपापप्रणाशिनी ॥२३॥ मंत्रस्योच्चारणादेव सर्वपापप्रणाशिनी ॥ उच्छिष्टदूषणं त्यक्त्वा सपवित्रो जपेन्मनुम् ॥२४॥" अत्र यद्यपि पुरश्चरणं नोक्तं तथाप्यष्टसहस्र जपः तद्दशांशेन होमादिकं च बोध्यम् ॥ यथा—"येषां जपे च होमे

च संख्यानोक्ता मनीषिभिः ॥ तेषामष्टसहस्राणि संख्या स्याज्जपहोमयोः ॥२५॥" इत्यभिधानाद्रष्टोत्तरसहस्रमिति सम्प्रदायः आसां सिद्धविद्यत्वात्पुरश्चरणं नास्तीति निबंधकाराः ॥ अथ मंत्र कोशे—"ऐंनमः उच्छिष्ट चांडालिमातंगि सर्ववशंकरि स्वाहा" ॥१॥ अस्य मंत्रस्य मदनऋषिः गायत्री त्रिवृच्छंदः देवी लघुश्यामा देवता ऐं बीजं स्वाहा शक्ति अभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ऐंरत्यै नमोमूर्ध्नि । ह्रीं प्रीत्यै नमःपादयोः । ह्रीं

द्रावण बाणाय नमः भ्रूमध्ये । द्रींशोषणबाणाय नमः मुखे । क्लींतापनबाणाय नमः हृदि । लूँमोह-नबाणाय नमः गुह्ये । सः तापनबाणाय नमः पादयोः ।। रामा ३ ग्नि ३ गुण ३ रामां ३ क ९ नेत्र २ वर्णैर्मनूत्थितैः ।। डेन्नमोऽताः कन्यकांता ब्रा-ह्म्याद्या अष्टमातरः ।। ऐं ब्रह्मकन्यकायै नमः । ॐ क्षाँ नमः ब्रह्मकन्यकायै नमः ।। ॐ ऐं सिद्धकन्यका-यै नमः ।। अणिमादिन्यासः ।। उर्वश्यादिन्यासः ।। यक्षादिन्यासः ।। क्लीं यक्षकन्यायै नमः । ॐ

अणिमाकन्यकायै नमः। ॐ महिमाकन्यकायै न-
मः। क्लींउर्वशीकन्यकायै नमः। पंश्चान्मूलवर्णन्या-
सः॥ ॐ ऐंनमः।ॐ नँनमः।मँनमः।ॐ उँनमः।
ॐछिँ नमः। ॐष्टँ नमः। ॐ चाँनमः। इत्यादिन्या-
सानेवंविधान्त्कृत्वा मातंगीमासने स्मरेत् ॥माणि-
क्याभरणान्वितां स्मितमुखीं नीलोत्पराभांबरां
रम्यालक्तकलिप्तपादकमलां नेत्रत्रयोल्लासि-
नीम् ॥ वीणा वादनतत्परां सुरनुतां कीरच्छद-
श्यामलां मातंगीं शशिशेखरामनुभजे तांबूलपूर्णा-

ननाम् ॥ २६॥ एकलक्षजपः ॥ मधूकपुष्पैर्होमः ॥ मातंगीपीठे लघुश्यामापूजनम् ॥ ऐं शुकप्रियायै विद्महे क्लीं कामेश्वरी धीमहि ॥ तन्नः श्यामा प्रचोदयात् ॥ इति श्यामागायत्रीमंत्रः ॥ अस्य उपासनाद्देवसमो भवेत् ॥चिंतितार्थ सिद्धिःस्यात् ॥३॥ अथोच्छिष्टचाण्डालिनीचेटकम् ॥ तदुक्तं मंत्रमहार्णवे ॥ अथ मंत्रः ॥ "ॐ नमः उच्छिष्टचा-ण्डालिनिवाग्वादिनिराजमोहिनि प्रजामोहिनि स्त्रीमोहिनि आन आन वे वे वायुवायु उच्छिष्ट-

चाण्डालि सत्यवादिनीकी शक्तिफुरै स्वाहा ॥"
इति मंत्रः ॥ अस्य विधानम् ॥ भोजन करके
जूंठे मुख इस मंत्रको एकलाख जपे ॥ पीछे जहां
कहीं एकांत में बैठकर इस मंत्र का स्मरण करोगे,
वहीं भोजन आकर अपने आप उपस्थित
होगा ॥इति श्रीह. वि. बृ. उपा. श्रीमदुच्छिष्टचा-
ण्डालिन्युपासनानिरूपणंनाम षट्चत्वारिंशदधि-
कद्विशततमोऽध्यायः ॥२४६॥

पुस्तकें मिलने के स्थान

१) खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर स्टीम प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
खेतवाडी, मुंबई - ४०० ००४.

२) खेमराज श्रीकृष्णदास,
६६, हडपसर इण्डस्ट्रिअल इस्टेट
पुणे - ४११ ०१३.

३) गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेंकटेश्वर स्टीम प्रेस,
व बुक डिपो,
अहिल्याबाई चौक, कल्याण
(जि. ठाणे - महाराष्ट्र)

४) खेमराज श्रीकृष्णदास,
चौक - वाराणसी (उ.प्र.)

इति.

उच्छिष्टगणपत्युच्छिष्टचाण्डालिन्युपासने

समाप्ते

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वीं खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,
फैक्स-०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जुना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष/फैक्स- ०२५१-२२०१०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS